ವಿಜಯನಗರದ ಶಿಲ್ಪಗಳು

Vol II

THE
CHOWKHAMBÂ SANSKRIT SERIES
A
COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.
NO. 397

मीमांसाकौस्तुभः।
(मीमांसासूत्रोपरि काचन विस्तृता टीका)
(तृतीयाध्यायस्य द्वितीयतृतीयौ पादौ)
पूर्वोत्तरमीमांसापारावारपारीण-
श्रीखण्डदेवविरचितः
श्रीकाशीहिन्दूविश्वविद्यालयपूर्वमीमांसाप्रधानाध्यापकेन
वेदविशारदबिरुदभाजा
पं०. अ. चिन्नस्वामिशास्त्रिणा
संशोधितः श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम्।

MIMAMSAKAUSTUBHA
[An exhaustive Commentary of Jaiminisutras]
(II & III Padas of III Adhyaya)

BY
KHANDADEVA.

Edited by
"Veda Visarada" Pandit A. Chinnaswami Sastri,
Chief Professor of Mimamsa. Benares Hindu University

Vol. II. FASCICULUS IV-४.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE,
Vidya Vilas Press, North of Gopal Mandir, Benares.

1930

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥
स्तबकः—३९७

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

THE

CHOWKHAMBÂ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NOS. 350, 359, 372 & 397

MIMAMSA KAUSTUBHA

(3rd & 4th Padas of 2nd Adhyaya, and 1st 2nd & 3rd Padas of 3rd Adhyaya)

BY

KHANDADEVA.

Edited by

"Veda Visarada" "Mimamsa-kesari"

Pandit A. Chinnaswami Sastri,

Chief Professor of Mimamsa. Benares Hindu University

Vol. II. FASCICULUS I to IV—१ से ४.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE,

Vidya Vilas Press, North of Gopal Mandir, Benares.

1929

Printed-Published & sold by
JAI KRISHNADAS-HARIDAS GUPTA,
The Chowkhamba Sanskrit Series Office,
VIDYA VILAS PRESS,
North of Gopal Mandir,
BENARES CITY.

THE
CHOWKHAMBĀ SANSKRIT SERIES,
A
COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.
Nos. 350, 359, 372, & 397.

मीमांसाकौस्तुभः ॥

(मीमांसासूत्रोपरि काचन विस्तृता टीका)

(द्वितीयाध्यायस्य तृतीयचतुर्थौ पादौ, तृतीयाध्यायस्य प्रथमद्वितीयतृतीयपादाश्च)

पूर्वोत्तरमीमांसापारावारपारीण-
श्रीखण्डदेवविरचितः
श्रीकाशीहिन्दूविश्वविद्यालयपूर्वमीमांसाप्रधानाध्यापकेन
वेदविशारदबिरुदभाजा मीमांसाकेसरिणा
पं० अ. चिन्नस्वामिशास्त्रिणा
संशोधितः

श्रीजयकृष्णदासगुप्तेन मुद्रापितो विजयताम् ॥

प्रकाशक—
जयकृष्णदास-हरिदासगुप्तः—
चौखम्बा संस्कृत सीरिज़-आफिस, विद्याविलास प्रेस,
गोपालमन्दिर के उत्तर फाटक,
बनारस सिटी ॥

सं० १९८६.

॥ श्रीः ॥

मीमांसाकौस्तुभस्य द्वितीयसम्पुटस्थ-
विषयसूची ॥

द्वितीयाध्यायस्य तृतीयः पादः—

द्वितीयाध्यायस्य चतुर्थः पादः—

तृतीयाध्यायस्य प्रथमः पादः—

तृतीयाध्यायस्य द्वितीयः पादः—

तृतीयाध्यायस्य तृतीयः पादः—

इति विषयसूची समाप्ता।

न चैवं छन्दोऽन्तराणामपि सत्त्वेन तत्सापेक्षत्वात्समासानुपपत्तिः। प्रकृतौ केवलगायत्रच्छन्दस्कप्रदानाभावेन नित्यसापेक्षत्वात्समासोपपत्तेः।

न च प्रकृतौ तदभावेऽपि बृहस्पतिसवे तत्सत्वान्न नित्यसापेक्षता। (१)यस्तस्तम्भे"त्यादिछन्दोऽन्तराणां सूक्तमुखीये विनियोगेन तदभावात्।

न च सोमसाध्यप्रदाने गायत्रच्छन्दस्कत्वस्य साक्षात्सम्बन्धेन सम्भवे स्तोत्रादिद्वारकपरम्परासम्बन्धेनान्याय्यत्वात् बृहस्पतिसवे च सत्यपि परम्परासम्बन्धेन छन्दोऽन्तरे साक्षात्प्रदाने तदभावात्केवलगायत्रच्छन्दस्कत्वसत्त्वेनोत्कर्षोपपत्तिः। गायत्रं छन्दो यस्येति बहुव्रीहिणा साक्षात्परम्परासम्बन्धसाधारण्येन गायत्रच्छन्दस्कत्वाभिधानात् प्रकृतौ च प्रकरणाख्यतात्पर्यग्राहकसत्त्वेन परम्परासम्बन्धेनापि निवेशोपपत्तावुत्कर्षकल्पनानुपपत्तेः।

न चावश्यं परम्परासम्बन्धेन ग्रहणेऽपि सापेक्षता। सत्यपि स्तोत्रादौ छन्दोऽन्तरे सर्वच्छन्दसां व्यासज्यसाधनत्वाभावेन स्वस्वावान्तरकार्ये निरपेक्षत्वात्। अतो युक्तः प्राकृत एवैन्द्रप्रदाने लिङ्गाद्विनियोगः। इदं च तदीययाज्यायां गायत्रच्छन्दस्कता नास्तीति कृत्वा चिन्तयोक्तम्।

यदा तु प्रातस्सवनस्येन्द्रप्रदान एव ज्योतिष्टोमे गायत्रच्छन्दस्कयाज्याम्नानं प्रसिद्धं तदोत्कर्षपूर्वपक्षासम्भवान्नैवेदमधिकरणम्।

अथवा गायत्रच्छन्दःपदं सवनविशेषणमेवाङ्गीकृत्यापवादलिप्सया चान्तरैव किं केवलमेव यस्मिन्सवने गायत्रं

---

१. यस्तस्तम्भ सहसा विज्मो अन्तान् बृहस्पतिस्त्रिषधस्थो रवेण। तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम्॥ (ऋ. सं. ४-५-६-१.) इति त्रिष्टुप्छन्दस्कानां ऋचामाम्नानादित्यर्थः।

छन्दः तत्रायं मन्त्रः ? उतान्यसहितच्छन्दस्केऽपीति सन्दिह्य समासबलान्मान्त्रवार्णिकतादृशकर्मान्तरविधिकल्पनयापि केवल-गायत्रच्छन्दस्कप्रातस्सवन एवायं मन्त्र इति पूर्वपक्षिते समासस्य पूर्वोक्तरीत्यैवोपपत्तौ विध्यन्तरकल्पने प्रमाणाभावादन्य-सहितगायत्रच्छन्दस्केऽपीति सिद्धान्तः कार्यः। तदा चेन्द्रपीत-पदमपि वस्तुतस्सवनविशेषणत्वादुदाहरणम्। सूत्रं स्पष्टम्॥

वृत्तमधिकरणम्॥

(अथेन्द्रपीताधिकरणसिद्धान्तः)

सू०—सर्वेषां त्वैकमन्त्र्यमैतिशायनस्य भक्तिपानत्वा-त्सवनाधिकारो हि॥ ३–२–४३॥

इदानीमिन्द्रपीताधिकरणसिद्धान्तोऽभिधीयते—ऐन्द्रानैन्द्र-प्रदानसाधारण्येन सर्वेषामुपदेशेनैव मन्त्रः। इन्द्रपीतपदस्य बहुव्रीह्यङ्गीकारेण सवनविशेषणत्वात्।

तथाहि-यद्यपि तत्पुरुषो लक्षणाद्वयापादकबहुव्रीह्यपेक्षया लघुभूतः तथापीह तत्पुरुषोऽपि लक्षणाद्वयापादकत्वादविशिष्टः। तत्पुरुषे हि पूर्वपदे तावदेका लक्षणेत्यविवादम्। अपरा च पीतपदे मुख्यपानासम्भवात् सक्तत्वलक्षणा।

यद्यपि चेयं बहुव्रीहावपि तुल्या, तथापि तन्मते त्यागविषयस्य हुताहुतसमुदायस्यैव पीतपदेनोक्तत्वादिन्द्राय त्यक्तस्समुदायो यस्मिन् सवने तस्य प्रातस्सवनस्य सम्बन्धी यः पात्रस्थो यत्कि-ञ्चिद्देवत्यस्सोमस्तस्यावयवं भक्षयामीत्येवमर्थो नानुपपन्नः। तत्पु-रुषे तु ते इत्यादि पुरोवर्तिनिर्देशस्य पात्रस्थसोमविषयत्वात्तद्वि-शेषणीभूतेनेन्द्रपीतपदेन सक्तसमुदायावयवस्य हुतावशिष्टस्य पुन-रपि लक्षणापत्तिः। यद्यपि(१) "चैन्द्राग्ने तु लिङ्गभावादि"त्यधिक-

१. पू. मी.३-३-३९.।

रणोक्तरीत्या स्वीकार एव पाधातुना लक्ष्यते, तस्य चावयवावयविसाधारणत्वात् भक्ष्यमाणावयनिष्ठस्यैव स्वीकारस्य पाधातुना लक्षणात्तत्पुरुषेऽपि नोक्तदोषापत्तिः, तथाऽप्यवयवगतस्य स्वीकारस्यावयविस्वीकारोपस्थितिसापेक्षत्वेन विलम्बोपस्थितिकत्वाच्च बहुव्रीहितुल्यत्वमस्त्येव ।

न चैवमपि बहुव्रीहिनियामकाभावः । प्रकरणविशेषस्यैव तत्त्वात् गायत्रछन्दआदिपदेन गायत्रं प्रातस्सवनमित्यादितात्पर्यग्राहकानुगृहीतसवनैकविशेषणत्वेन प्रायपाठाच्च ।

एतेन प्रातस्सवनादिपदसामानाधिकरण्येऽपि प्रातस्सूयत इति व्युत्पत्त्या प्रातस्सवनादिपदस्यैव सोमविशेषणत्वमित्यपास्तम् । उभयोपपत्तौ प्रकरणविशेषस्यैव नियामकत्वात्, प्रातस्सवनादिपदानां तु रूढ्या यज्ञभागवचनत्वेनावयवव्युत्पत्तिकल्पनायोगाच्च । न चैवमपि बहुव्रीहेस्समानाधिकरणत्वाभावादननुशिष्टत्वम् "सप्तमी विशेषणे बहुव्रीहा"विति ज्ञापकस्य विभक्तिमात्रे बहुव्रीहिद्योतकत्वेनेन्द्रेण यस्मिन्सवने स्वीकृत इत्येवं व्यधिकरणबहुव्रीहेरप्यनुशिष्टत्वात् ।

वस्तुतस्तु विभक्तिमात्रे द्योतकत्वे 'समानाधिकरणानां बहुव्रीहिरिष्यत' इति कात्यायनवचनस्य निर्विषयत्वापत्तेः सप्तमीविषय एव तस्य द्योतकता । प्रकृते त्वर्शआद्यच्प्रत्ययं मत्वर्थीयं भावव्युत्पन्नं पीतशब्दोपरि कृत्वा "पीतप्रातिबद्धवत्सा"मित्यादिवत् पीतमस्यास्तीति पीतः इन्द्रः पीतो यस्मिन्सवन इति व्युत्पत्त्या समानाधिकरण एव बहुव्रीहिरिति न कश्चिद्दोषः । ततश्च वसुमद्गणस्य गायत्रच्छन्दस इन्द्रपीतस्येत्यादित्रिकत्रयं क्रमेण प्रातस्सवनादिविशेषणम्, तच्च सोमस्य, स चावयवद्वारा भक्षणस्य,—उक्तविशेषणयुक्तस्य सवनस्य सम्बन्धी यस्सोमस्तस्यावयवं भक्षयामीति । ततश्च

युक्तस्सर्वेष्वेवानैन्द्रेष्वैन्द्रेषु चाविकारेणैव भक्षमन्त्रः।

अस्मिंश्च पक्षे वसुमद्गणादित्रिकत्रयस्य प्रातस्सवनादित्रये क्रमेणान्वयात्सूक्तवाकवद्विभज्य विनियोगोऽपि सिद्धो भवति॥ प्रयोजनं तत्तत्पक्षोपपादनेनैव स्फुटम्॥

सूत्रं सर्वेषां त्वैकमन्त्र्यं, यतोऽयं सवनाधिकारः तत्र हेतुः पानस्य भाक्तत्वादिति व्याख्येयम्॥

यदि तु पीतशब्दस्य पूर्वनिपातापत्तिरस्मिन्पक्षे विभाव्यते तदास्त्विन्द्रेण पीतमस्मिन्निति बहुव्रीहिः। तत्रापि तु निष्ठान्तत्वेन पूर्वनिपातशङ्कायां तु तत्पुरुष एवायं लक्षणया सवनपरः। सोमपरत्वे तैत्तिरीयशाखायामिन्द्रपीतपदस्य प्रातस्सवनादिभेदेन पृथक् पाठवैयर्थ्यापत्तेः। लिङ्गादेवेन्द्रप्रदाने प्रातस्सवनादिपदानां विभागोपपत्तेः। अतस्तस्य लक्षणया सवनपरत्वाद्युक्तमेव सर्वत्रैकमन्त्र्यम्। विभागोऽपि च तैत्तिरीयशाखाक्रमेणैव बोध्यः। याज्ञिकास्तुहैवमामनन्ति॥

(इतीन्द्रपीताधिकरणम्)

मीमांसाम्बुनिधिं प्रमथ्य सुदृढैन्यार्योच्चयैर्निर्जरैः
कृत्वा जैमिनिसूत्रमन्दरममुं वेदं तथा वासुकिम्।
यद्धालाहलसंज्ञमेव कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्यो मणिः॥

श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य।
मीमांसाकौस्तुभाख्या शेषाध्याये द्वितीयाङ्घ्रेः।

इति श्रीरुद्रदेवसूनुखण्डदेवकृतौ मीमांसाकौस्तुभे तृतीयाध्यायस्य द्वितीयः पादः॥

श्रीः ।

मीमांसाकौस्तुभे

तृतीयाध्यायस्य तृतीयः पादः ॥

प्रथमं उच्चैस्त्वादीनां वेदधर्मताधिकरणम् । (१)

(उपक्रमाधिकरणम्)

सू–श्रुतेर्जाताधिकारस्स्यात् ॥३–३–१॥(पू)

(विषयसंशयौ)

ज्योतिष्टोमे—(१)प्रजापतिरकामयत प्रजास्सृजेयेति स तपोऽतप्यत, तस्मात्तेपानात्त्रयो देवा अजायन्ताग्निर्वायुरादित्यः, ते तपोऽतप्यन्त, तेभ्यस्तेपानेभ्यस्त्रयो वेदा असृज्यन्ताग्नेर्ऋग्वेदः, वायोर्यजुर्वेदः, आदित्यात्सामवेद" इत्युपक्रम्य "उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैस्साम्ना, उच्चैर्निगदेनेति श्रुतम् । तत्र किमृचा ऋङ्मन्त्रेण यत् क्रियते तदुच्चैरित्यर्थाङ्गीकारादुच्चैष्ट्वादिकमर्थप्रकाशनादिरूपऋगादिमन्त्रकार्याङ्गत्वेन विनियुज्यते ? किं वा ऋचा ऋग्वेदेनेत्यर्थाङ्गीकारात्तत्तद्वेदविहितकर्माङ्गत्वेनेति विचार्यते ।

(सङ्गतिः)

अत्र च लिङ्गकल्पकप्रमाणगम्यविनियोगोपयोगिचिन्तनं पादार्थः । तानि च वाक्यप्रकरणस्थानसमाख्यारूपाणि । न तु श्रुतिलिङ्गे अपि । यथा चैतत्तथा बलाबलाधिकरणे वक्ष्यते ।

---

१. ऐ. ब्रा.५–५–६. ।

(वाक्यलक्षणम्)

तत्र वाक्यं नामाङ्गत्वघटकीभूतपरोद्देश्यत्वकृतिकारकत्वान्यतरपदार्थकल्पनानुकूलः श्रुतपदसान्निधिः। यथा 'धेनुर्दक्षिणा' 'उच्चैर्ऋचा क्रियते' 'प्रयाजशेषेण हवींष्यभिघारयती'त्यादौ। अस्ति ह्यत्राङ्गत्वघटकीभूतकर्मत्वकरणत्वादिरूपपदार्थकल्पनानुकूलत्वं श्रुतपदसांनिधेः। कल्पनाशब्देन च संसर्गविधालक्षणासाधारण्येन शक्तिजन्यपदार्थोपस्थितिभिन्नबोधमात्रं विवक्षितम्। तेन न श्रुतावतिव्याप्तिः। नापि संसर्गविधया भासमानकरणताके 'धेनुर्दक्षिणे'त्यादावव्याप्तिः। 'प्रयाजशेषणे'त्यादौ तु तृतीययैव कर्मत्वस्य धातुना च करणत्वस्य लक्षणात् कल्पना स्फुटैव। श्रुतपदसंनिधेश्च योग्यताज्ञानं विना कर्मत्वादिकल्पकत्वानुपपत्तेः योग्यतारूपलिङ्गानुमापकत्वम्। श्रुतस्यैव पदस्य कर्मत्वादिलक्षकत्वाङ्गीकारेण कर्मत्वादिवाचकपदरूपश्रुतिकल्पकत्वाभावेऽपि च श्रुतस्य पदस्य तत्तात्पर्यकत्वरूपधर्मवैशिष्ट्यरूपेण कल्पनाच्छ्रुतिकल्पकत्वोपपत्तिः।

वस्तुतस्तु एतादृशश्रुतिकल्पनस्य संसर्गविधया भासमानकरणत्वस्थले वक्तुमशक्यत्वाच्छ्रुतितो दौर्बल्यानापत्तेः धेनुदक्षिणापदयोश्च सुबन्तयोः परस्परान्वयस्याव्युत्पन्नत्वादावश्यकभावनान्वयस्य च प्रथमान्तयोर्धेनुदक्षिणापदयोरसंभवादवश्यं धेनुप्रातिपदिकोत्तरप्रथमया करणत्वं, दक्षिणापदेन च तत्कार्यवृत्तिकर्मत्वं लक्षयित्वान्वयस्य वाच्यत्वाल्लक्षणे कल्पनाशब्देन लक्षणाजन्योपस्थितिरेवाभिप्रेता। 'उच्चै'रित्यादौ निपातादिस्थलेऽपि लुप्तविभक्त्यर्थस्य प्रातिपदिकेनैव लक्षणान्नाव्याप्तिः।

प्रकरणादिस्वरूपं तु तत्र तत्र निरूपयिष्यते। तदिह लिङ्गकल्पकं वाक्यमुच्चैष्ट्वादीनां विनियोजकम्।

यद्यपि च तत्पूर्वपक्षे सिद्धान्ते च तुल्यं तथापि तद्गम्यविनियोगोपयोग्युद्देश्यतावच्छेदकविचारणात्पादाध्यायसङ्गतिः।

अत एव पक्षद्वयेऽपि 'ऋचा क्रियत' इत्यस्यैवोद्देश्यसमर्पकता। न तु सिद्धान्तेऽपि वेदशब्दस्य। सा तु किं ऋगादिपदवाच्यऋगादिमन्त्राणामेवोद्देश्यघटकत्वेन? उत ऋक्पदलक्ष्यवेदस्योद्देश्यवाचकत्वेनेत्येतावत्संदिग्धम्। अनन्तरा तु श्रुतिमात्रकल्पकप्रमाणगम्यविनियोगे विचारिते ऽधुनोभयकल्पकप्रमाणगम्यविनियोगविचारावसरात् स्पष्टा।

(पूर्वपक्षः)

तत्र विधेयाया उच्चैष्ट्वादिभावनायास्संनिहितानन्यपरे उद्देश्य(१)समर्पके संभवति न तावदर्थवादस्थमेव वेदपदमुद्देश्यसमर्पकमिति वक्तुं शक्यम्।

अथ तस्य तत्प्रतिपादकत्वासंभवेऽपि लक्षणातात्पर्यग्राहकत्वाङ्गीकारादृगादिपदमेव वेदलक्षणयोद्देश्यघटकसमर्पकमित्युच्यते, ततः श्रौतार्थस्यैव ऋगादेरुद्देश्यघटकत्वोपपत्तेर्न तावत्तदनुपपत्तिर्लक्षणाबीजम्। नाप्यार्थवादिकवेदपदसमभिव्याहारानुपपत्तिः। ऋच्यपि वेदत्वस्य पर्याप्तत्वेन व्याप्यधर्मावच्छिन्नसम्बन्धिनोऽपि विधेयस्य व्यापकधर्मवत्सम्बन्धित्वेन स्तुत्युपपत्तेः। नहि वेदत्वं मन्त्रब्राह्मणात्मके ग्रन्थे पर्याप्तं, द्वित्रिवाक्याध्यायिनि शूद्रे वेदाध्ययनप्रयुक्तदोषानापत्तिप्रसङ्गात्। अस्तु वा तत्तथा, तथाप्यवयवसम्बन्धिनोऽपि विधेयस्य परम्परयाऽवयविसम्बन्धस्यापि सत्त्वादपां स्तुत्या वेतसावकास्तुतिवद्वेदपदेन स्तुत्युपपत्तिः। अस्तु वा वेदपदऋगादिपदयोः परस्परविरुद्धार्थकत्वं तथापि न वेदपदानुरोधेन ऋगादिपदे लक्षणा। अपि तु तदनु-

१ प्रतिपादक।

रोधेन वेदपद एव वेदैकदेशस्य, अर्थवादस्य स्वभावत एव लक्षणाभाजनतया तत्रैव लक्षणौचित्यात् ।

न चार्थवादगतस्याप्युपक्रमस्थत्वेनासञ्जातविरोधित्वात्प्राबल्यमिति वाच्यम् । असञ्जातविरोधित्वं ह्युद्देश्यप्रतिपादकत्वे नियामकमुच्यते ? ऋक्पदलक्षणातात्पर्यग्राहकत्वे वा ? नाद्यः; वेदपदमात्रश्रवणेन विधेयांचेष्ट्वादिभावनापदश्रवणं विना तत्प्रातियोगिकोद्देश्यत्वनिर्णयायोगात्तदुपस्थितिवेलायां विरोधिनोऽपि ऋगादिपदस्योपस्थितत्वेन निर्णयवेलायामसञ्जातविरोधित्वाभावात् । अत एव विधेयोपस्थितिवेलायामेवोपस्थितस्य ऋगादिपदवाच्यस्यैवार्थस्योद्देश्यघटकत्वोपपत्तौ तस्य लक्षणातात्पर्यग्राहकत्वमिति द्वितीयस्त्वनाशङ्क्य एव ।

अत एव यत्र प्रथमोपस्थितिजन्यनिर्णयोत्तरमेवोत्तरोपस्थितिस्तत्रैव प्रथमस्यासञ्जातविरोधित्वात्प्राबल्यमिति (१)"मुख्यं वा पूर्वचोदना"दित्यत्रैव वक्ष्यते, नत्वत्र । अस्तु वा तत्, तथापि नेहोपक्रमस्य प्राबल्यम्, परत्वेनापच्छेदन्यायेनोपसंहारस्यैव प्राबल्योपपत्तेः ।

न च तद्वदिहार्थवादसापेक्षत्वेन पूर्वनिरपेक्षत्वाभावात्तन्न्यायाप्रवृत्तिः । विधेः स्तुत्यंशे तदपेक्षायामपि वाच्यार्थपरत्वांशे तदपेक्षाभावात् । अतश्च यथैव 'नेदं रजतं' 'न कलञ्जं भक्षये'दित्यादौ निषेध्यप्राप्त्यर्थं भ्रमरागाद्यपेक्षत्वेऽपि तद्गतप्रामाण्याद्यनपेक्षत्वात्परस्यैव प्राबल्यं तद्वदिहापीति न कश्चिद्विरोधः ।

मास्तु वेहाप्यपच्छेदन्यायप्रवृत्तिः, तथाप्युपसंहारस्य विध्यन्तर्गतत्वाद्विधेश्चार्थवादापेक्षया प्राधान्यात्प्राबल्योपपत्तिः । नहि प्रधानमप्युपसंहारस्थं दुर्बलम्, अङ्गगुणविरोधन्यायस्य

१. पू. मी.१२-२-२३.

'मुख्यं वा पूर्वचोदना'दिति न्यायापवादकत्वात् । अन्यथा "य इष्ट्या पशुना सोमेने"त्युपसंहारस्थस्यापि सोमयागस्य प्रधानत्वात्पर्वानुग्रहो वक्ष्यमाणो विरुध्येत । अतश्च सत्यपि विरोधे नोपक्रमस्य प्राबल्यम् ।

वस्तुतस्तु नेह विरोधोऽपि । वेदत्वस्य प्रत्येकवृत्तितया ऋच्यप्यविरोधात् । अत एव यत्राश्वप्रतिग्रहेष्ट्यादौ विरोधः तत्रोपक्रमानुसारेण दातृविषयत्वमिष्टमेव । तस्मादृगादिकार्योद्देशेनैव ऋगादिवृत्तितयोच्चैष्ट्वादिविधिः ।

सूत्रं तु ऋगादिशब्दस्य श्रुतिवृत्तत्वलाभाय ऋगादिजातस्यैवोद्देश्यत्वेनाधिकारस्स्यादिति व्याख्येयम् ॥

(इति पूर्वः पक्षः)

सू–वेदो वा प्रायदर्शनात् ३–३–२ ॥ (सि)

(अथ सिद्धान्तः)

नात्र ऋगादिकार्यस्योद्देश्यत्वम्, अपि त्वृग्वेदादिविहितस्यैव, उपक्रमस्थवेदपदविरोधापत्तेः ।

तथाहि–न तावद्वेदत्वं प्रत्येकवृत्ति, वाक्यमात्राध्ययने वेदाध्ययनप्रसिद्ध्यभावात् । न हि द्वित्रिवाक्याध्ययनेन वेदपारायणादिविध्यर्थमनुष्ठितं मन्यन्ते ।

यत्तु द्वित्रिवाक्य(१)श्रवणे शूद्रस्य दोषानापत्तिरिति । तत्रोच्यते—सर्वत्र विधिवाक्ये 'कूश्माण्डं दद्या'दित्यादौ जातेस्तदवच्छिन्नावयविव्यक्तेश्च साधनत्वं तदाक्षिप्तं च जात्यनवच्छिन्नानामप्यवयवानाम् । अवयवावयविसाधनत्वयोश्चैकपदोपादानादुपादेयस्थले साहित्यस्य विवक्षितत्वान्नावयवोपादानमात्रेण

१ वाक्याध्ययने ।

शास्त्रार्थनिष्पत्तिः । अत एव साहित्यरूपाङ्गासम्भवे नित्यादौ तन्मात्रोपादानमिष्टमेव । 'कूश्माण्डं न भक्षये'दित्यादिनिषेधस्थले त्वनुवाद्यगतत्वेन साहित्यस्य विवक्षितत्वादवयवभक्षणेऽपि प्रत्यवायः ।

अतश्चेह शूद्रस्य द्वित्रिवाक्याध्ययनेऽपि दोषः, पारायणादौ तु समस्तग्रहणमिति सिद्धं भवति । 'अहरहस्स्वाध्यायमधीयीते'त्यादौ तु प्रत्यहं सर्वस्वाध्यायपाठासम्भवादेकदेशग्रहणमिति विशेषः । तेन मन्त्रब्राह्मणसमुदायात्मके ग्रन्थे पर्याप्तत्वाद्वेदत्वस्य ऋक्त्वादिनोपसंहारानुपपत्तेः विरोधे सत्युपक्रमस्थत्वाद्वेदत्वस्यैवोद्देश्यघटकत्वम् ।

तथाहि—वेदशब्दस्तावदर्थवादस्थितोऽपि प्रथमोपस्थितत्वात्स्वार्थस्य स्तुतिविषयत्वं बोधयन्नविधेयस्य स्तुत्ययागाद्विधेयतामेवाक्षिपति । विधियोग्यविधेयान्तरलाभे तु तदपेक्षितोद्देश्यतां तद्घटकतां वा । अतश्च तादृशोच्चैष्ट्वादिरूपविधेयलाभाद्वेदपदार्थ उद्देश्यघटकतां प्रतिपद्यते । ततश्च तस्यासञ्जातविरोधित्वात् पश्चादुपनिपतदृगादिपदं न स्वार्थस्योद्देश्यघटकतां बोधयितुमलम् ।

अतश्च यथैव "यो होता सोऽध्वर्यु"रित्यत्रोपसंहारस्थमध्वर्युपदमेव कार्यलक्षणां भजते तथेहाप्युपसंहारस्थमृगादिपदमेव तदनुरोधेन वेदलक्षकम् । अत एव विधेरुद्देश्यघटकापेक्षायां प्रथमोपस्थितार्थवादोन्नीतवेदरूपोद्देश्यघटकलाभेऽपि तस्य स्तुतिविषयत्वेनान्वितस्योद्देश्यघटकत्वेनान्वयायोगादुपस्थापकपदान्तरापेक्षायां समभिव्याहृतस्य ऋगादिपदस्यैव लक्षणया तदुपस्थापकत्वं न विरुध्यते । अतश्चापेक्षाक्रमेण ऋगादिपदानां प्रमाणान्तरोपस्थितोद्देश्यघटकशाब्दबोधजनकत्वस्यैवावधारणात् तैः स्वशक्यार्थस्योद्देश्यघटकत्वाप्रमापणात्तद्विषय-

उत्पत्तिप्रतिबन्धलक्षणो बाध उपक्रमस्थवेदपदानुरोधेनावगम्यते । अत एवायमप्राप्तबाध इति भण्यते ।

अत एव यत्र परस्यापि सामग्रीसत्त्वे स्वविषयप्रमाजनकत्वमप्रतिबद्धं, तत्र तस्यार्थान्तरे पूर्वसाकाङ्क्षत्वेऽपि स्वविषयप्रमोत्पत्तेरप्रतिबन्धात्तेनैव पूर्वस्य स्वाविरोधिविषयपरत्वमुपकल्प्य स्वविरोधिविषये मिथ्यात्वबोधनाद्बाधः, यथाऽपच्छेदादिस्थले । अत एव स प्राप्तबाध इति भण्यते । नत्वयं प्रकृतेऽस्ति । उत्तरस्य पूर्वविरुद्धविषयकप्रमाजनने विध्यपेक्षाभावेन सामग्र्यभावात् । अतोऽत्रोपक्रमस्यैव प्राबल्यम् ।

ननु सत्यमुपक्रमापेक्षया तत्प्रतिबद्धात्मलाभस्योपसंहारस्य दौर्बल्यम् । प्रतिबन्ध एव त्विहोपक्रमस्थेनाऽर्थवादत्वादङ्गभूतेन प्रधानभूतस्य विधेरशक्यसम्पादः । अत एव यत्र नाङ्गप्रधाभावस्तत्रैवैकवाक्यत्वादाविति परस्य प्रथमोपस्थितापेक्षया दौर्बल्यम् , यथा 'यो होता सोऽध्वर्यु'रित्यादौ । प्रकृते तु यथैव 'य इष्ट्ये'त्यादावुपसंहारस्थस्यापि प्रधानभूतस्य सोमस्य धर्मानुग्रहस्तथैव विधेरपीति चेत् —

सत्यं प्रधानभूतस्योपसंहारस्थस्यापि प्राबल्यं, न त्विह तथा, प्रधानभूतस्यो'च्चैः क्रियत' इत्यस्य विधेर्विरोधाभावात् । विरुद्धस्य च ऋगादिपदस्य न विध्यन्तर्भावः । उद्देश्यघटकत्वाप्रमापणात् । अतो नायमङ्गगुणविरोधन्यायस्य विषयः ।

अत एव यत्रोत्तरस्यापि पूर्वाविरोधेन कार्यान्तरपरत्वासंभवः तत्र परस्यापि शक्यार्थपरत्वात्तस्य च प्राधान्यादङ्गगुणविरोधन्यायापवादक उपक्रमन्यायस्य, यथा 'य इष्ट्ये'त्यादौ ।

वस्तुतस्तु न तत्रोपक्रमन्यायोऽपि । यजेतेति प्रत्ययाभिहितसर्वभावनोद्देशेन विविदिषावाक्यवद्वाशब्दार्थविशिष्टकालविधेः

(१)प्रकरणान्तराधिकरणे व्युत्पादितत्वेनेष्ट्यादिपदानामनुवादमात्रतया तदभावात् ।

एतेन यत्कैश्चिदेतस्याङ्गगुणविरोधन्यायोदाहरणत्वसिद्ध्यर्थमिष्ट्यादिवाक्ये वाक्यत्रयमेवाङ्गीकृत्योपक्रमन्यायाभाव इत्युक्तं तदपास्तम्। अस्मदुक्तरीत्यैकवाक्यत्वोपपत्तौ तदङ्गीकारे प्रमाणाभावात्। यदपि च तद्ग्रन्थादेकवाक्यत्वे सत्युपक्रमन्यायस्यैव प्राबल्यं तदभाव एव त्वङ्गगुणविरोधन्यायस्येति प्रतीयते तत् "चतुरो मुष्टीन्निर्वपती"त्यादावेकवाक्यत्वेऽपि मुष्टीनां प्राधान्यात्सप्तदशशरावे चरावनुग्रह इत्येवं पूर्वपक्षकरणं सिद्धान्ते चोभयोः क्रियान्वयित्वात्प्राधान्याभावोपपादनं दुर्घटं स्यादित्येवमुपेक्षितम् । तस्मात्सत्यप्यङ्गगुणविरोधन्यायस्योपक्रमन्यायापवादकत्वे प्राधान्यापह्नवेनैव प्रकृतसिद्धान्तोपपादनं द्रष्टव्यम् । तत्सिद्धमृग्वेदादिविहितकर्मोद्देशेन तदीयमन्त्रवृत्तित्वसम्बन्धेनोच्चैष्ट्वादिविधिरिति ।

सूत्रं तु वेदो वोद्देश्यताघटकः प्राये वाक्योपक्रमे वेदशब्ददर्शनादिति व्याख्येयम् ॥

सू–लिङ्गाच्च ॥ ९–३–३ ॥

"ऋग्भिः प्रातर्दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः" इत्यत्र द्वितीयतृतीयपादस्थयोर्वेदशब्दयोरुपसंहारस्थत्वेऽप्यनेकत्वात्तदनुरोधेनोपक्रमस्थस्याप्येकस्य ऋक्पदस्यैव लक्षणया वेदपरत्वं, चतुर्थपादे वेदैरिति बहुवचनादप्ययमर्थो निश्चीयते । अतश्च प्रकृतोदाहरणे सत्यपि लक्षणाविशेषे प्रयुक्तत्वादृगादिशब्दा एव वेदपरा न तु वैपरीत्यम् ॥

---

१ पू. मी. कौ. २–३–११. पृ. ८८

सू–(१)त्रयीविद्या च तद्विदि ॥ ३–३–४ ॥

लोकेऽपि च वेदत्रयीविदि त्रैविद्यशब्दः प्रयुज्यते। त्रयीशब्दश्च ऋग्यजुस्सामसु प्रसिद्धः । अतश्च त्रयीशब्दस्य वेदत्रये लक्षणात् तत्पर्यायाणामृगादिशब्दानामपि तल्लक्षकत्वमवसीयते । अतोऽपि तत्रैव लक्षणा ॥

सू–व्यतिक्रमे यथाश्रुतीति चेत् ॥ ३–३–५ ॥

नन्वेवं यत्रैकमेव कर्म वेदत्रयेऽपि समाम्नातं तत्र तदङ्गभूते मन्त्रे तव मते उच्चैष्ट्वादीनां विकल्पापत्तिः । मम तु ऋचां यजुर्वेदपाठनिबन्धने व्यतिक्रमेऽपि ऋक्त्वानपायाद्यथाश्रुत्येव स्वरानुष्ठानान्न पक्षे बाध इति चेत् ।

सू–(२)न सर्वस्मिन्निवेशात् ॥ ३–२–६ ॥

न समाम्नानमात्रेण स्वरप्राप्तिः । ऋचा क्रियत इत्यत्र ऋचां विधानस्यैवोद्देश्यताघटकत्वेनोपादानमित्येवं वक्ष्यमाणत्वात् । विधानं च भूयस्त्वादिना एकस्मिन्नेव वेद इति नानेकस्वरप्राप्तिः । यत्रापि नान्यन्निर्णायकं तत्रापि कर्मान्तरत्वापत्तेर्न तदनेकता। अस्तु वा तत्रागत्या विकल्पोऽपि ।

सर्वस्मिन्निवेशेऽपि न साङ्कर्यमिति सूत्रव्याख्या ॥

सू–वेदसंयोगान्न प्रकरणेन(३)बाध्यते॥ ३–२–७॥

नन्वस्य ज्योतिष्टोमप्रकरणे पाठाद्वेदधर्मत्वपक्षे प्रकरण-

---

१ एतत्सूत्रात् पूर्वं "धर्मोपदेशाच्च नहि द्रव्येण सम्बन्धः" इति सूत्रमुपलभ्यते भाष्यशास्त्रदीपिकादिषु । परं तु कौस्तुभादर्शेषु सूत्रमिदं अधिकरणान्ते दृश्यते ।

२ सूत्रस्यास्य 'न सर्वस्मिन्नविशेषात्' इति पाठोऽन्यत्र दृश्यते ।

३ बाध्येत ।

बाधः प्रसज्येत। ऋगादिधर्मत्वपक्षे हि ऋक्त्वादिधर्माणां प्रत्येकवृत्तित्वात् ज्योतिष्टोमप्रकरणेऽपि च ऋक्त्वावच्छिन्नजन्यकार्यस्य सत्त्वाद्युक्तः प्रकरणानुप्रवेशः। तत्र तु वेदत्वस्य व्यासज्यवृत्तित्वेन प्रकरणस्थवाक्येष्वपर्याप्तत्वात्प्रकरणेनोद्देश्यस्य स्वविषय उपसंहारानुपपत्तेर्वाक्यप्रमितोद्देश्यबाधेनैव प्रकरणानुग्रहो वाच्यः। न चासौ युक्तः। तेन वेदत्वावच्छिन्नविहितकर्ममात्रोद्देशेन स्वरविधानात् प्रकरणबाध इति चेत्—

न; वाक्येन प्रकरणबाधस्येष्टत्वात्। न चैवं कस्यापि कर्मणो वेदत्वावच्छिन्नविहितत्वाभावात्स्वरविध्यनुपपत्तिः। द्वौ घटौ रूपवन्तौ कर्तव्यावित्यादौ रूपकर्तव्यतायाः प्रत्येकान्वयेऽपि द्वित्वस्य तदितरसंख्यावच्छिन्नव्यावर्तनेनैवोद्देश्यतावच्छेदकत्ववद्वेदत्वस्याप्युपपत्तेः। न ह्यत्र वेदत्वमुद्देश्यविशेषणम्। क्रियते इत्युद्देश्यसमर्पकस्य पदस्य साकाङ्क्षत्वेन हाविरार्तिवदुद्देश्यतावच्छेदकत्वप्रतीतेः। अत एव ऋचा ऋग्वेदेन यत्क्रियते विधीयते तत्रोच्चैष्ट्वं कर्तव्यमिति विपरिणामेन व्याहारोऽपि ध्येयः। श्रूयमाणस्यैव प्रत्ययस्य विपरिणामेन विधित्वकल्पनेत्यन्ये। सर्वथा प्रकरणबाधो न दोषाय।

सूत्रं वेदसंयोगात्सर्वस्मिन्क्रतौ निवेशः प्राप्तः प्रकरणेन न बाधितुं शक्य इति तदेव बाध्यत इति यत्न च दोषायेति व्याख्येयम्। बाधेतेति पाठे निवेशमुच्चैष्ट्वादिधर्मः प्रकरणानुरोधेन बाधेतेति यत्नेनेति व्याख्येयम्॥

सू—धर्मोपदेशाच्च न हि द्रव्येण सम्बन्धः ॥३-३-८॥

ऋक्धर्मत्वपक्षे साम्नोऽपि 'ऋच्यध्यूढं साम गायती'ति वचनेन ऋच्येव गेयत्वात्पुनस्तद्धर्मत्वेनोच्चैष्ट्वविधिरनर्थकः।

यद्यपि च प्रजापतिहृदयाद्यनृक्सामविषयकत्वेन सार्थक्यं

शक्येत तथाप्यल्पविषयत्वं तावत्तदवस्थमेव। वेदधर्मत्वे तु न कश्चिद्दोषः ॥ प्रयोजनं स्पष्टम् ॥

इत्युपक्रमाधिकरणं प्रथमम् ॥ १ ॥

अथ द्वितीयं गुणमुख्यव्यतिक्रमाधिकरणम् ॥(२)

सू—गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥ ३–३–९ ॥ (पू)

(विषयसंशयौ)

आधानं तावद्याजुर्वैदिकमित्यविवादम् । तदङ्गत्वेन च वारवन्तीयादीनि सामान्याम्नातानि। तेषां च पाठस्सामवेदे निर्विवादः। अयमेवोत्पत्तिविधिशब्देनाभिप्रेतः। न ह्यन्य आग्नेयादिवदुत्पत्तिविधिरस्ति। विनियोगविधिरपि च भाष्यकारमते तत्रैव। 'य एवं विद्वानग्निमाधत्त' इत्यनूद्याधानं "वारवन्तीयं गायती"ति विधानात्। प्रयोगविधिस्तु सर्वेषामङ्गानां प्रधानविधिविधेयत्वाद्याजुर्वैदिक एव। 'उच्चैर्ऋचा क्रियते' इत्यत्र च करोतिना तृतीयान्तपदसमभिव्याहारादृग्वेदकरणकव्यापारो विधानाख्योऽभिधीयते।

तत्र किमुत्पत्तिविधानरूपस्य विनियोगविधानरूपस्य वा व्यापारस्याभिधानात् साम्नूच्चैस्स्वरः ? उत प्रयोगविधानरूपव्यापाराभिधानादुपांशुत्वमिति विचार्यते।

(सङ्गतिः)

उद्देश्यतावच्छेदकघटकविशेषचिन्तनाच्च पादाध्यायसङ्गतिः।

ऋगादिपदार्थे निरूपिते तदनन्तरभाविकरोतिधात्वर्थनिरूपणाच्चानन्तरा। उत्पत्तिविनियोगविधिवेदानिबन्धनस्वरङ्गा-

नस्य प्राथमिकस्य बलवत्त्वापत्त्वादाद्या सा ।

(पूर्वपक्षः ।)

तत्र प्रयोगविधेर्विनियोगोत्पत्तिसापेक्षत्वात्तयोः पूर्वभावित्वेन तन्निबन्धनस्वरस्य शीघ्रोपस्थितिकत्वेनासञ्जातविरोधित्वाद्बलवत्त्वं पूर्वाधिकरणन्यायेनैव । अत एव प्रयोगविधेस्तत्सापेक्षत्वान्नापच्छेदन्यायोऽपि । त्रयाणामप्येतेषां सामरूपाङ्गविषयत्वान्नाङ्गगुणविरोधन्यायोऽपि । न हि प्रधानभूत आधानेऽस्माभिरुपांशुत्वं बाध्यते, येन स आपाद्येत ।

किञ्चोत्पत्तिविनियोगयोः प्रतिपदार्थं भिन्नत्वात्तन्निबन्धनस्वरस्य विशेषविहितत्वमसावकाशत्वं च । अतस्तेनानेकाङ्गप्रधानसाधारणप्रयोगविधिनिबन्धनस्वरस्य सामान्यविहितस्यान्यत्र सावकाशस्य च बाध इति प्राप्ते—

(भाष्यकारीयः सिद्धान्तः)

भाष्यकारेण तावत्प्रयोगविध्याश्रयस्य स्वरस्य बलवत्त्वमित्येवं सिद्धान्तितम् । तस्यायमाशयः—स्यादयमुपक्रमप्राबल्यादिन्यायो यद्युत्पत्तिविनियोगकालयोस्स्वरापेक्षा भवेत् । तस्य तु कालादिवत्प्रयोगविधिविशेषणत्वेनापेक्षितत्वात्तन्निबन्धनस्यैव स्वरस्य प्राबल्यम् ।

यद्यपि चातद्विशेषणत्वाभावेऽपि तदनन्तरमपेक्ष्यत इत्युच्यते तथापि तदपेक्षादशायां प्रयोगस्यैव वा व्यवधानेन पूर्वमुपस्थितत्वात्तन्निबन्धनस्वरस्यैव ग्रहणम् । अतश्च यथैव प्रमाणबलाबलस्य पूर्वमुपस्थितत्वेऽपि प्रमेयविरोधसापेक्षत्वात्तदालोचनदशायां प्रमेयबलाबलस्यैव पुरस्स्फूर्तिकत्वेन निर्णायकत्वं एवमिहापि द्रष्टव्यम् । इष्यते चायं न्यायः उत्पत्तिविनियोगयोः परस्परविरोधे ।

किञ्चोपांशुत्वमङ्गधर्मोऽपि समानप्रमाणकप्रधानवृत्तिताकत्वात्प्रधानप्रत्यासन्नमिति बलवत् । अतस्तेनानीदृशमुच्चैष्ट्वं बाध्यते । अयं च न्यायोऽङ्गगुणन्यायाद्भिन्न एवेति न तेनापि पौनरुक्त्यम् ।

सूत्रे तु मुख्यगुणशब्दाभ्यां समानप्रमाणकप्रधानवृत्तिताकं तद्भिन्नं च विवक्षितत्वाद्व्याख्येयम् ।

वार्तिककाराशयस्तु—न प्रयोगविधिवेदनिबन्धनत्वं स्वरस्य । प्रयोगविधिर्हि न क्वचिदपि वेदे पार्थक्येन श्रुतः । अङ्गवाक्यान्येव हि प्रधानवाक्यैकवाक्यतामापन्नानि प्रयोगविधिशब्दार्थः । अतश्च परिशेषात्तत्तद्वाक्यानां वेदेनैव तस्य वेदविशेषावधारणम् । ततश्च यत्राङ्गप्रधानवाक्ययोरेकवेदस्थत्वं तत्र प्रयोगवेदनिबन्धनस्वराङ्गीकारेऽप्यविरोधान्नैव कश्चिद्विचारः । यत्रापि नानावेदस्थत्वं तत्रापि प्रयोगविधेः प्रधानांशे ऽन्यवेदीयत्वेनान्यस्वरापादकत्वादङ्गांशे च वेदान्तरीयत्वेनोत्पत्तिविनियोगाविध्यनुकूलस्वरस्यैवापादनान्नैव कश्चिद्विरोध इति न विचारावसरः ।

न चाङ्गस्य प्रयोगविधिवेदनिबन्धनस्वराविषयत्वेऽपि कालादिवत्प्रयोगान्वयित्वात्स्वरस्य तस्य चाङ्गप्रधानसाधारणत्वात्प्रधानान्वयिस्वरस्यैव वेदत्रयाविहितानुमितविधिविहिताङ्गान्वयवद्वेदान्तरीयाङ्गेऽपि निवेशोपपत्तेः वेदान्तरीयविनियोगविधिनिबन्धनस्वरबाधोपपत्तिरिति वाच्यम् । प्रधानविधिवेदनिबन्धनस्य स्वरस्य प्रधानमात्रोद्देशेनैव विहितस्याङ्गेषु कल्पनीयत्वात्तेषु च क्लृप्तस्य वेदान्तरीयाङ्गोत्पत्तिविनियोगप्रयोगाविधिवेदनिबन्धनस्वरस्य बाधानुपपत्तेः ।

अत एव ऋग्वेदादित्रयस्य हौत्राध्वर्यवौद्गात्रसमाख्याभिर्हौत्रादिकर्तृप्राप्तेस्तद्वेदविहिते कर्मणि वक्ष्यमाणत्वाज्ज्योति-

ष्टोमाद्यङ्गभूतस्तोत्रादेराधानाङ्गभूतसाम्नां चोद्गातृकर्तृकत्वसिद्धिः। अन्यथा भवदुक्तयुक्तिनिचयेन तत्राप्यध्वर्युकर्तृकत्वापत्तेः क्लृप्तकल्प्यत्वेनैव च प्रयोगवचनाश्रितस्य चोदकाश्रितापेक्षया दौर्बल्यमिति श्येने उद्गातृमात्रकर्तृकत्वबाधेन नानाकर्तृकत्वसिद्धिः।

अत एव यत्र प्रधानसम्बन्धिन एव धर्मस्याङ्गोद्देशेनापि विधानात्तेष्वपि क्लृप्तैव। यथा 'अप्स्ववभृथेन चरन्ती'त्यादौ तृतीयानिर्देशेन साङ्गस्यैव करणत्वावगमेनाङ्गप्रधानसम्बन्धिन एव धर्मस्याङ्गोद्देशेनाप्यपां विधानात् तत्र चोदकाश्रितस्याप्सुदौर्बल्यमेव।

प्रकृते तूपांशुत्वस्य प्रधानमात्रोद्देशेन विहितस्याङ्गे कल्पनीयत्वात्प्रधानप्रयोगविधेश्च वेदान्तरीययागांशे याजुर्वैदिकत्वाभावेन स्वत उपांशुत्वाप्रापकत्वान्नाधानसाम्नामुपांशुत्वसिद्धिः। अपि तु सामोत्पत्तिविनियोगप्रयोगाणां सामवैदिकत्वादुच्चैष्ट्वादिसिद्धिरेव स्यादिति। अतोऽन्यथाधिकरणं वर्णितम्—

नाधानसाम्नां सामवेदे विनियोगो वस्तुतस्समस्ति।
कृत्वाचिन्तया विचारस्य तु नैव किञ्चित्फलं पश्यामः।
अपि तु यजुर्वेद एव। पाठापरपर्यायोत्पत्तिरेव तु सामवेदे। अतश्च प्रधानप्रयोगविधिरेव सामांशे उत्पत्तिविध्यनुसारेण सामवैदिकस्सन्नुच्चैष्ट्वं विधत्ते उत विनियोगविध्यनुसारेण याजुर्वैदिकस्सन्नुपांशुत्वमिति सन्देहः।

अस्मिंश्च पक्षे करोतेः प्रयोगविधिव्यापाराभिधायित्वस्य निर्णीतत्वात्तदर्थविचाराभावेऽपि चापवादिकयैवानन्तरसङ्गतिः। पादाध्यायसङ्गतिस्तु पूर्ववदेव।

तत्रोत्पत्तिविनियोगयोरुभयोरप्येकसाममात्रविषयत्वात्सावकाशनिरवकाशसामान्यविशेषभावन्याययोरिहासम्भवेऽपि भा-

त्पकारांक्तरीत्यैवोत्पत्तेः प्राथमिकत्वेनासञ्जातविरोधित्ववदुत्तरभाविविनियोगापजीव्यत्वाच्च तद्विध्यनुसारेणैव प्रयोगविधेर्वेदविशेषीयत्वनिश्चयात्तद्वेदनिबन्धन एव स्वरो बलवानिति प्राप्ते--

(वार्तिककारीयः सिद्धान्तः)

सिद्धान्तितम्-यद्यप्युत्पत्तिः प्राथमिकी तथापि न तदानीं स्वरापेक्षा। यदा च प्रयोगविधिकाले सा तदा विनियुक्तस्य प्रयोगेन विनियोगविधिरेव पुरस्फूर्तिकः नोत्पत्तिविधिः। विनियोगविधिना व्यवाहितत्वाद्विनियोगविधेः फलनिरूपितत्वेनोत्पत्तिविध्यपेक्षया प्राधान्याच्च। अतश्च तदनुसारेणैव प्रयोगविधेर्वेदविशेषीयत्वनिश्चयात्तद्वेदनिबन्धनस्योपांशुत्वस्वरस्यैव बलवत्त्वम्। सोऽयमप्राप्तबाधः।

न चैवं तेनैव न्यायेनाध्वर्युकर्तृकत्वापत्तिः। न्यायेन तदापत्तावपि वचनेनैव वैकल्पिकब्रह्मोद्गातृकर्तृकत्वाङ्गीकारात्।

न चैवं तुल्यन्यायत्वाद्दर्शपूर्णमासाद्यङ्गेष्वपि वेदान्तरोत्पत्तिकेषु विनियोगविधिनिबन्धनस्वरापत्तिः। न्यायेन प्राप्तावपि वचनेन बाधात्।

तथा हि-दर्शपूर्णमासयोरेव तावदङ्गप्रधानयोस्तत्तद्विनियोगविध्यनुसारेण प्रयोगविधिना उपांशुत्वादौ प्राप्ते 'मन्द्रमाज्यभागान्तं, परं मध्यमया, उत्तमयानूयाजादीनि वचनेन प्राप्तबाधविधया भागधर्मस्य स्वरस्य विधानात् मन्द्रादिस्वरः तत्रापि विशेषवचनादिना क्वचिदुच्चैष्ट्वादीत्येव ध्येयम्।

एवं तद्विकृतीनामप्यकाम्यानां प्रधानांशे प्राकृताङ्गांशे तत्कार्यापन्नाङ्गांशे च तावत्प्रकृतस्वरस्यैव ग्रहणम्।

न च तत्रौपदेशिकनानावेदस्वरस्यैव प्राबल्यम्। "उच्चैर्ऋचा क्रियते" इत्यस्यान्यपरत्वेनाप्युपपत्तौ क्लृप्तोपकारप्राकृतस्वरस्य

श्येने कर्त्रादिवद्बाधानुपपत्तेः। प्राकृताङ्गांशे औपदेशिकत्वस्याप्यभावाच्च। अप्राकृताङ्गांशेऽपि च प्राकृतस्यैव स्वरस्य ग्रहणम्। प्रकृतौ स्वरस्य भागधर्मत्वेन तद्भागारम्भकाप्राकृतवृत्तित्वेऽप्यप्राकृतकार्यकारितानापत्तेः। काम्यासु तु "यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्या" इति वचने प्रधानमात्रे उपांशुत्वम्। "अप्स्ववभृथेन चरन्ती"तिवत् तृतीयानिर्देशाभावेन साङ्गेऽस्याप्रवृत्तेः। एवमस्यापवादकानि विशेषवचनानि द्रष्टव्यानि।

एवं ज्योतिष्टोमेऽपि तत्तद्विनियोगविध्यनुसारेण नानावेदस्वरे प्राप्ते दर्शपूर्णमासप्राकृताङ्गविषये श्येनन्यायेन प्राकृतेन स्वरेण तस्य बाधः। तत्रापि 'यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ती'त्यनेनाग्नीषोमीयपशुप्राग्भाविपदार्थाङ्गत्वेन विहितमुपांशुत्वं सामान्यविहितं नानावेदस्वरमिव प्राकृतमपि स्वरं बाधते। तमपि च "यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्, मन्द्रं प्रायणीयायां, मन्द्रतरमातिथ्यायामुपांशूपसत्स्वि"त्यादिनिरवकाशविशेषवचनविहिताः स्वरा दीक्षणीयादिप्रधानमात्रांशे बाधन्ते, न तु तदङ्गांशेऽपि। 'यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्या' इतिवत्प्रधानमात्रोद्देशेन विहितत्वात्।

अत एव "उच्चैः प्रवर्ग्येणे"त्यनेना"प्स्ववभृथेन चरन्ती"तिवत्साङ्ग एवोच्चैष्ट्वविधानात्साङ्ग एव प्रवर्ग्ये उपांशुत्वबाधकता।

न चैवमप्यग्नीषोमीयप्राग्भावित्वादेवोपसत्सूपांशुत्वसिद्धे 'रुपांशूपसत्स्वि'ति पृथग्विधिवैयर्थ्यम्। उपसत्पदस्य निरवकाशविषयातिरिक्तपदार्थमात्रोपलक्षणत्वमङ्गीकृत्यौचित्येन दीक्षणीयादिस्वरप्रशंसार्थत्वेनाप्युपपत्तौ भिन्नवाक्यत्वापादकविध्यन्तरकल्पने प्रमाणाभावात्। अत एव नानेन तस्योपसंहार इत्यपि ध्येयम्।

अग्नीषोमीयादौ तु दर्शपूर्णमासप्रकृतिके प्राकृतं त्रैस्वर्यमेव। अतत्प्रकृतिके तु नानावेदस्वर एव । तद्विनियोगविध्यनुसारात्। सुत्यायां त्वङ्गप्रधानसाधारण्येन 'मन्द्रं प्रातस्सवने चरन्ती'त्यादिवचनाविहितैस्सवनक्रमेण मन्द्रमध्यमोत्तमस्वरैः प्राकृतानां सवनीयादौ स्तोत्रादौ च नानावेदस्वरस्य बाधः ।

न च प्रातस्सवनादिशब्दानामवयवव्युत्पत्त्या सोमयागाभ्यासविशेषवाचित्वान्मन्द्रं प्रायणीयायामितिवत् प्रधानमात्र एव निवेशश्शङ्क्यः । चरन्तीति प्रयोगवाचिधातुसमभिव्याहारात्प्रातस्सवनादिशब्दस्यापि स्वशक्यघटितप्रयोगैकदेशलक्षकत्वावगतेः प्रायणीयादिवैलक्षण्यात् ।

यत्तु वार्तिके सप्तमीनिर्देशाद्भावांस्तत्तदाधारो मन्त्रस्तत्र सर्वत्रायं स्वर इति प्रतीतेरङ्गप्रधानसाधारण्यं सवनस्वरस्येत्युक्तम् , तत् प्रायणीयादिष्वपि तथाप्रसक्तेर्मन्त्रस्य चाकाशाधारस्य सवनाधारत्वानुपपत्तेरङ्गतासम्बन्धेनैव सप्तम्या व्याख्येयत्वादुपेक्षितम् । सुत्योत्तरकालीनेषु तु दर्शपूर्णमासप्रकृतिकेषु प्राकृतोऽपूर्वेषु नानावेदस्वर इति स्पष्टमेव । एतेन ज्योतिष्टोमविकारा व्याख्याताः ।

यत्त्वस्यां स्वरचर्चायां वार्तिके प्रकारान्तरेण स्वरानयनं तदस्थायिभाष्यकारमते स्थित्वा तदुपवर्णनान्न दोषाय । अतश्चान्यत्र स्वरान्तरप्राप्तावप्याधानस्याप्युपांशुत्वमव्याहतमेव । प्रयोजनं स्पष्टम् ।

सूत्रं गुणमुख्यशब्दाभ्यामुत्पत्तिविनियोगयोर्विवक्षितत्वात्स्पष्टम् ॥

इति द्वितीयं गुणमुख्यव्यतिक्रमाधिकरणम् ॥ २ ॥

सू—भूयस्त्वेनोभयश्रुति ॥ ३—३—१० ॥

(विषयसंशयसङ्गतयः)

एवं तावद्यत्र वेदान्तर उत्पत्तिर्वेदान्तरे च विनियोगः तत्र विनियोगविधिनिबन्धनः स्वर इत्युक्तम् । यत्र तु वेदान्तरे फलसम्बन्धश्रवणात् विनियोगः वेदान्तरे च कर्त्रादिश्रवणात्प्रयोगः तत्रापि प्रयोगकाल एव स्वरापेक्षणाद्युक्तितौल्येन विनियोगविधेरपि प्रयोगविधितो दौर्बल्यात्प्रयोगविधिनिबन्धन एव प्रधानांशे स्वर इत्यप्यर्थसिद्धम् ।

न च स्वरस्य प्रयोगविधावनन्वयः । तथात्वे तदाश्रयस्य मन्त्रस्य साङ्गप्रधानसम्बन्धापत्तेरिति केषांचिदुक्तं युक्तम् । प्रयोगविधावेवापेक्षाक्रमेणान्वयेऽपि मन्त्रस्य लिङ्गेन प्रधानमात्र एवान्वयोपपत्तेः ।

एवं यत्र वेदान्तर एव विनियोगो वेदान्तरे चाख्यातसामानाधिकरण्यं विना वसन्ते ज्योतिष्टोम इत्येवं रूपेण कालदेशाद्यन्वयः तत्रापि प्रयोगविधित्वात्तन्निबन्धन एव स्वर इति बोध्यम् । आख्यातसामानाधिकरण्ये सति प्रकरणान्तरन्यायेन कर्मान्तरत्वापत्तेः ।

एवं च यत्र प्रयोगविधिपरिचायकं विनियोगविधिपरिचायकं वा कालफलादिकं भेदेन वेदद्वयेऽप्यस्ति तत्र विनिगमनाविरहादिनोभयत्रापि तद्विधित्वनिश्चयात्स्वरविकल्पे प्राप्ते यत्रोत्पत्तिस्तद्वेदनिबन्धन स्वर इत्यविवादम् । अतस्तादृशविषये क्वोत्पत्तिरिति विचारणीयम् ।

एवं यत्र कालफलाद्यनुपादाय उत्पत्त्यन्वयी गुणः कर्ममात्रं वोभयत्र श्रुतं तत्राप्येवं विचारः । पादाध्यायसङ्गती पूर्ववत् । प्रासाङ्गिकी त्वनन्तरा ।

(पूर्वपक्षः)

तत्र यत्र तावदुत्पत्त्यन्वयी द्रव्यदेवतास्तोत्रशस्त्रादिरुभयत्रापि गुणस्स्ववाक्ये श्रुतः, तत्र विनिगमनाविरहेणोभयत्राप्युत्पत्तिविधिः ।

न चैवमुत्पन्नस्योत्पत्त्ययोगात्कर्मान्तरत्वापत्तिः । पिङ्गाक्ष्येकहायनीशब्दवत्सहप्रवृत्तेर्युगपद्विधायकत्वात् । तद्वदेव विशेषणांशविधिफलकत्वान्न वैयर्थ्यमपि ।

न चैवं वाजिनादिस्थलेऽपि तथापत्तिः । पाठक्रमस्य नियामकत्वेन सह प्रवृत्त्यभावात् ।

एवं यत्रापि कर्ममात्रं वेदद्वये श्रुतं तत्रापि नाभ्यासात् कर्मान्तरत्वम्, वाक्यान्तरोपात्तगुणान्वयार्थत्वेनानन्यपरत्वाभावात्। नापि तदर्थमेकत्रानुवादः । विनिगमनाविरहादुभयत्र लिङ्गादिसत्त्वेनैकत्र तदर्थत्यागापत्तेश्च । अतस्तत्राप्युभयत्रोत्पत्तिविधिः ।

यत्र तूभयत्रापि कालादिश्रवणं तत्र विध्यन्तराक्षिप्ताया उत्पत्तेर्वेदविशेषे नियन्तुमेवाशक्यत्वम् । अतश्च सर्वत्रैवंजातीयके स्वरविकल्प इति प्राप्ते--

(सिद्धान्तः)

अभिधीयते--अङ्गबाहुल्येन प्रधानोत्पत्तिविधिनिर्णयः, सेवकबाहुल्येन राजावस्थाननिर्णयवत् ।

वस्तुतस्त्वस्य व्यभिचरितत्वात्कर्मस्वरूपपरिचायकद्रव्यदेवतादिसाकल्यसत्त्वस्यैव तन्निर्णायकत्वम् । तत्रापि द्वैविध्ये बहिरङ्गत्वेऽप्यव्यभिचाराद्देवताया एव, न तु द्रव्यस्य । अतश्च तादृशगुणसत्त्वे तेनैव विधिनिश्चयादन्यत्र स्ववाक्योपात्तोत्पत्त्यन्वयिगुणसत्त्वेऽपि तदनुवादेनैवाविरोधिगुणविधानम् । विरोधिगुणसत्त्वे तु तेन भेद एव ।

न च पिङ्गाक्ष्येकहायनीन्यायः। तद्वदिहैकवाक्यत्वाभावेन सहप्रवृत्त्यभावात्। अतस्तत्र भेद एव। कालफलादिरूपविध्यन्तरान्वयिगुणसत्त्वे तु तस्य प्रयोगादिविधायितामात्रम्। उत्पत्त्यंशे त्वनुवाद एव। यत्र तूभयत्रापि स्ववाक्ये कर्ममात्रश्रवणं वाक्यान्तरे चैकत्र देवतादिविधिरपरत्र तु तदविधायैवाविरोधिगुणान्तरश्रवणं तत्र सत्यप्युभयत्रापि लिङादिश्रवणात्पिङ्गाक्ष्येकहायनीन्यायेन विधित्वे एकत्रैव देवताविधिसमभिव्याहारवत्युत्पत्तिविधितात्पर्यकत्वम्। अपरत्र तु सत्यप्युत्पत्तिविधित्वे न तत्तात्पर्यकता। वाक्यान्तरोपात्तगुणविनियोगोपयोगिप्रकरणोज्जीवनार्थत्वात्। अत एव न तत्रानारभ्याधीतता।

यत्र तु वेदान्तरे लडन्तेन कर्ममात्रमुक्त्वा वाक्यान्तरे गुणोपादानं तत्र पूर्ववाक्यस्य नैव विधित्वम्। अपि तु अनुवादत्वमेव गुणविधानार्थम्। तत्र तु तस्यानारभ्याधीततेत्येतावान् विशेषः।

वस्तुतस्तु लिङन्तस्थलेऽपि नोभयोर्विधित्वं विहितविधानायोगात् पिङ्गाक्षीन्यायस्यैकवाक्यत्वप्रयुक्तत्वाच्च। अपि तु परिचायकतानुरोधेनैकस्य विधित्वमपरस्यानुवादतेति बोध्यम्।

अतश्चोत्पत्तिविधिवेदनिबन्धन एव स्वरो बलीयानिति सिद्धम्। वाक्यान्तरे विरोधित्वसमानगुणश्रवणे तु भेदः। एवमुभयत्र कर्ममात्रश्रवणेऽपि बोध्यम्।

प्रयोजनं सूत्रं च स्पष्टम्॥

(वृत्तमधिकरणम्)

अथ प्रकरणाधिकरणं चतुर्थम् ॥ (४)

सू—असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात् ॥ ३-३-११ ॥

(विषयसंशयसङ्गतयः)

'शेषः परार्थत्वा'दित्यत्र प्रमाणं विना पारार्थ्यस्य वक्तुमशक्यत्वाच्छ्रुत्यादिकमपि प्रमाणमुपक्षिप्तम् । तत्र च श्रुतिवाक्ययोर्लिङ्गस्य च(१) तद्भूताधिकरणे(२) सामर्थ्याधिकरणे च स्वरूपेण विनियोजकत्वस्योक्तत्वादङ्गाङ्गितयोरवच्छेदकमात्रं निरूपितम् । इदानीं तु प्रकरणादीनां स्वरूपेणैव विनियोजकत्वमाक्षिप्य समाधीयते । स्वस्यापि कथञ्चित्तत्रोपयोगित्वात्पादाध्यायसङ्गतिः ।

अनन्तरा तु पूर्वाधिकरणे वेदान्तरीयशुद्धोत्पत्तिविधेः प्रकरणोज्जीवनार्थत्वेऽभिहिते प्रकरणस्यैवाक्षेपाद्द्रष्टव्या ।

(पूर्वपक्षः)

तत्र न प्रकरणं नाम किञ्चिदस्ति विनियोजकम् । तद्धि यदि सन्निधिमात्रं भवेत् ततो गोदोहनादेरपि दर्शाद्यङ्गत्वप्रसङ्गः ।

अथ साकाङ्क्षत्वमात्रं, ततो विकृतेरपि प्राकृताङ्गविषये साकाङ्क्षत्वात् तदङ्गत्वस्य च प्रकरणगम्यत्वापत्तिः ।

अथ साकाङ्क्षत्वे सति सन्निधिपठितत्वम् , ततो विकृतावुपहोमादौ तदापत्तिः ।

अथोभयाकाङ्क्षाविशिष्टं तत्प्रकरणमित्युच्येत, ततो मन्त्राणामपि सन्निधौ पाठात्प्रकरणाद्दर्शाद्यङ्गत्वप्रसङ्गः ।

न चेष्टापत्तिः । अत एव तत्र तत्र मूले तथा व्यवहार इति वाच्यम् । मन्त्राणां सिद्धरूपत्वेन प्रकरणाविषयत्वात् ।

---

१. १-१-७   २. १-४-१५

अत एव लिङ्गादेव तत्राङ्गत्वम् । प्रकरणं त्वधिकाराख्यं सामान्यसम्बन्धबोधकमेव । अस्तु वा क्वचिल्लिङ्गाभावे तस्यैव स्थानविधयाङ्गताबोधकत्वं न तु प्रकरणविधया । सिद्धान्ते सिद्धरूपस्य प्रकरणविषयत्वानङ्गीकारात् । अर्थप्रकाशनादिरूपक्रियाविशिष्टत्वेन क्रियारूपत्वं तु लिङ्गाद्यभावादनाशङ्क्यमेव ।

अथेतिकर्तव्यतात्वेन साकाङ्क्षत्वविशिष्टसन्निधौ पाठः प्रकरणमित्युच्यते, तत इतिकर्तव्यतात्वस्यैवाशक्यानिर्वचनत्वम् । तद्धि न तावत्प्रकरणेन फले जन्यमाने सहकारिकारणत्वम्, अग्नीषोमीयादेरप्याग्नेयाङ्गत्वापत्तेः; प्रयाजादीनां प्राधान्यापत्तेश्च ।

न चाग्नेयादीनां फलं प्रति करणत्वेन प्राधान्येऽपि न प्रयाजादीनां तत्प्रति करणता येन प्राधान्यमाशङ्क्येत । अपि त्वपूर्वे एव तेन जन्यमाने सहकारिकारणत्वमिति वाच्यम् । तथात्वेऽपि विकृतौ फलकारणत्वेन सौर्ये लब्धेऽप्यपूर्वकारणत्वेन प्रयाजादिवदाग्नेयस्यापि जनकत्वाविशेषादतिदेशापत्तेरपूर्वस्य धर्मिग्राहकप्रमाणेन स्वकार्यजनकजन्यत्वेन क्लृप्तस्य कारणान्तरानपेक्षत्वाच्च ।

एतेन नापूर्वं प्रत्याग्नेयादीनामिव प्रयाजादीनां कारणत्वमात्रम् । अपि तु करणत्वमेव स्वस्वावान्तरादृष्टद्वारा ।(१)ततश्चाग्नेयादौ तदभावान्न विकृतावतिदेश इत्यपास्तम् । (२)कारणानपेक्षत्ववत्करणानपेक्षत्वस्यापि तुल्यत्वात् । नापि करणजनकत्वमितिकर्तव्यतात्वम्, प्रयाजादिषु तस्य बाधितत्वात्, द्रव्यादावपि तत्सत्त्वेन प्रकरणग्राह्यत्वापत्तेश्च ।

एतेन करणानुग्राहकत्वमितिकर्तव्यतात्वमित्यपि निरस्तम् । करणतद्व्यापारतत्कार्यजनकत्वातिरिक्तस्यानुग्राहकत्वस्य दुर्व-

१. अतएवः । २. कारणान्तरानपे ।

चत्वात्।एवमन्योत्पादकस्वभावव्यापारत्वमेवाख्यातार्थो न तु यागानुकूलयत्नत्वम् । तस्य च विशेषापेक्षायां प्रयाजादीनां तत्त्वेनान्वयः । अतश्च व्यापारसामान्यरूपभावनापेक्षितविशेषत्वमेवेतिकर्तव्यतात्वमिति पार्थसारथिमतमपास्तम् । निरुक्तेतिकर्तव्यताकाङ्क्षालक्षणप्रकरणस्य निरुक्तसम्बन्धबोधकत्वेऽपि तदघटिताङ्गत्वबोधकत्वानुपपत्तेः । प्रयाजानां करणतद्व्यापारतत्कार्यजनकत्वायोगेन करणादीनामन्यपदवाच्यत्वायोगात् । प्रयाजादीनामुक्तविधभावनाविशेषत्वानुपपत्तेश्च ।

किञ्च प्रधानवाक्येऽपूर्वकल्पनातः पूर्वमाख्यातार्थोपस्थितिदशायामन्यपदार्थो न तावदपूर्वं सम्भवति। यागस्तु प्रयाजाद्यजन्यत्वाद्बाधित एव ।

न च फलम् ,समप्राधान्यापत्तेः। न च फलं प्रति यागस्यैव समानपदश्रुत्या करणत्वं प्रयाजादीनां तु कारणत्वमेवेति न साम्यमिति वाच्यम् । प्रयाजादीनामपि स्वस्वादृष्टरूपव्यापारसत्त्वेन करणत्वस्य दुर्निवारत्वात्। यागस्य साक्षात्फलेन समानपदोपात्तत्वाभावेन भावनाद्वारैव तस्य वाच्यत्वात्तदपेक्षया भावनारूपाणां प्रयाजादीनामेव कारणत्वस्य वक्तुमुचितत्वाच्च । अस्मन्मते तु यागानुकूलस्य यत्नस्यैव भावनापदार्थत्वात्तस्य च यागजननेनैव क्लृप्तप्रयोजनस्य फलकरणत्वकल्पनानुपपत्तिरिति वैषम्यम् ।

किञ्चैवं प्रधानस्य स्वतो निराकाङ्क्षत्वादन्यतराकाङ्क्षयैव प्रकृतौ प्रयाजाद्यङ्गत्वापत्तिः । विकृतौ च भावनाया विशेषापेक्षायामक्लृप्तोपकारैरपि सन्निहितैरुपहोमैरेव निराकाङ्क्षत्वोपपत्तेर्नातिदेशकल्पनापत्तिः ।

अतश्चेतिकर्तव्यतात्वस्य दुर्निरूपत्वात्तद्घटितस्य प्रकर-

णस्यापि दुर्निरूपत्वमिति न तेन प्रयाजादीनां दर्शाद्यङ्गत्वम् । अपि तु फलाकाङ्क्षायां विश्वजिन्न्यायेन दर्शपूर्णमासफलानुषङ्गेण वा "वर्म भ्रातृव्याभिभूत्या" इत्यर्थवादेन वा फलं पौरोडाशिक-समाख्यया वा तत्साध्याग्नेयाद्यङ्गत्वं सन्निधानमात्रेण वोपहो-मवत् षड्यागाङ्गत्वमिति प्राप्ते--

(सिद्धान्तः)

अभिधीयते-अस्ति प्रकरणं नाम चतुर्थं प्रमाणम् । न च तन्निर्वचनासम्भवः । अवगतफलसम्बन्धसन्निहितवा-क्यप्रमितपदार्थवृत्ति यत्पूर्वप्रमाणानवगताङ्गताकविषये इतिकर्त-व्यतात्वप्रकारकापेक्षणं तस्यैव तत्त्वात् । अस्ति हि दर्शपूर्णमा सादौ प्रयाजादिविषये तत्, दर्शपूर्णमासयोस्स्वर्गादिवाक्यैः फलसम्बन्धस्यावगतत्वात् ।

अत एव फलसम्बन्धानवगतौ न समिद्यागस्य सत्यपी-तिकर्तव्यताकाङ्क्षत्वे तनूनपाद्यागाङ्गता । अङ्गिनस्सन्निहितवाक्यप्र-मितेति विशेषणाच्च नासन्निहितज्योतिष्टोमाद्यङ्गत्वं प्रयाजादी-नाम् । अङ्गस्य पूर्वप्रमाणानवगताङ्गताकेति विशेषणाच्च न प्रोक्षणा-दीनां श्रुतिलिङ्गवाक्यैरवगतव्रीह्याद्यङ्गभावानां प्रकरणाद्दर्शाद्य-ङ्गतापत्तिः ।

न चेष्टापत्त्या तत्पदवैयर्थ्यम् । प्रोक्षणादीनां श्रुत्यादिनैवा-ङ्गत्वावगतौ व्रीह्यादिपदे आङ्गितावच्छेदकलक्षणातात्पर्यग्राह-कतामात्रस्य प्रकरणकृत्यत्वात् । तदपि चेदं नेतिकर्तव्यताकाङ्क्षा-लक्षणस्य विनियोजकप्रमाणस्य कृत्यम् । अपि तु सन्निध्यप-रपर्यायस्याधिकाराख्यस्यैव । लोके तस्यैव तथा क्लृप्तत्वात् ।

न चापूर्वसाधनीभूताङ्गत्वस्य श्रुत्यादिगम्यत्वेऽप्यपूर्वाङ्गत्वस्य यागाङ्गत्वस्य वा कथंभावात्मकप्रकरणगम्यत्वोपपत्तिः । अपूर्वा-

ादिकं प्रति प्रयोज्यत्वमात्रेणैव सम्बन्धोपपत्तावङ्गत्वकल्पने प्रमाणाभावात्, अपूर्वसाधनीभूताङ्गत्वस्यापूर्वाङ्गत्वं विनानुपपत्तेस्तस्यार्थसिद्धत्वेन प्रकरणव्यापारानपेक्षणाच्च । अत्र च प्रकरणोत्तरप्रमाणानां (१)बलाबलाधिकरणवक्ष्यमाणन्यायेन मन्थरप्रवृत्तित्वादङ्गताबोधकत्वानुपपत्तेर्व्यावर्त्याभावात्पूर्वपदं सिद्धानुवादमात्रम् ।

एवं वाक्यपदमप्येकवाक्योपात्तपदसन्निहिते बृहस्पतिसवादावश्यं वाक्यादिप्रमाणेनाङ्गत्वावगमात् तेनैव व्यावृत्तिसिद्धेस्स्पष्टार्थमेव । "वामदेव्यं गायती"त्यादौ च प्रमाणान्तरेणानवगताङ्गताकसामविषयेऽवगतफलस्य स्तोत्रस्य सन्निहितस्य स्वसाधनीभूतऋगक्षराभिव्यक्त्यर्थमपेक्षासत्त्वात्प्रकरणेनाङ्गत्वप्राप्तौ तद्व्यावृत्त्यर्थमितिकर्तव्यतात्वेति विशेषणम् । तस्य ऋगक्षराभिव्यक्त्यर्थं सामापेक्षायामपीतिकर्तव्यतात्वेन सिद्धरूपसामविषयेऽनपेक्षणात् ।

न चेतिकर्तव्यतात्वमेव दुर्निरूपम्, सर्वत्र ह्यशक्तस्य करणत्वायोगात् शक्तिः करणनिष्ठा समस्तीति निर्विवादम् । सा चास्मन्मते पदार्थान्तरमेव दण्डादिधर्मः । धर्मस्य च जन्यधर्मिवृत्तित्वात् जन्यत्वमेव रूपादिवदित्युत्सर्गः । क्वचिदेव तु बाधकसत्त्वेन कारणानिर्वचनेऽनादित्वमपि । अत एव दण्डादिवृत्तिशक्तिरनवस्थादोषभीत्याऽनादिरेव । यागादिवृत्तिशक्तिस्त्वपूर्वजननानुकूला उत्सर्गतस्स्वकारणमपेक्षमाणा यागस्यैव कारणत्वकल्पनेऽनवस्थापत्तेस्सन्निहितं प्रयोजनापेक्षं प्रयाजादि स्वकारणत्वेन गृह्णातीति इयमेवाकाङ्क्षेतिकर्तव्यताकाङ्क्षा । अत एव यावत्कारणलाभमेव तस्याजन्यत्वकल्पनान्नानवस्थादोषः । द्रव्यदेवतवामदेवादिसिद्धपदार्थस्य तु न कर-

१. पू. मी. ३-३-७.

णवृत्तिशक्तिजनकत्वम् । दृष्टविधयैव करणजनकत्वेन प्रयोजनाना-काङ्क्षत्वात् । स्वस्वनियमादृष्टोपहितस्य तु करणं प्रत्यजनकत्वात्तन्निष्ठशक्तिजनकत्वमिष्टमेव । नियमादृष्टोपहितत्वं च नोदासीनस्येति अवान्तरक्रियायुक्तस्य द्रव्यादेरितिकर्तव्यतात्वव्यवहारोऽपि शास्त्रे एतन्मूलक एव । तत्सिद्धं स्वकरणनिष्ठशक्तिजनकाकाङ्क्षत्वं भावनाया इतिकर्तव्यताकाङ्क्षत्वम् । शक्तिरेव मूले सामर्थ्योद्बोधपदेन व्यवह्रियत इति द्रष्टव्यम् ।

न चैवमपि वामदेव्यादेस्सामर्थ्यादेव स्तोत्राङ्गतावगमादनवगताङ्गताकेति विशेषणादेव व्यावृत्तिसिद्धेरितिकर्तव्यतात्वप्रकारकेति विशेषणानर्थक्यमिति वाच्यम् । सामर्थ्यमात्रस्यातिप्रसक्तत्वात्सामान्यसम्बन्धबोधकप्रमाणाभावाच्चाङ्गताबोधकत्वानुपपत्तेः ।

अस्तु वा सूत्रस्वारस्यादितिकर्त्तव्यताकाङ्क्षत्वमेव प्रकरणम् । तस्य तु योग्यविषयजिज्ञासायां प्रमाणान्तरानवगतेत्यादिविशेषणम् । न तु तस्य लक्षणे प्रवेशः । श्रुत्यादिसर्वप्रमाणसाधारणस्य व्यावर्तकत्वादाकाङ्क्षाया आसत्तिसहकारेणैव कारणत्वात् ज्योतिष्टोमाद्यनङ्गत्वस्य तदभावादेवोपपत्तेः संनिहितेत्यादि विशेषणस्य प्रकरणलक्षणे प्रवेशः ।

अस्तु वा विकृतावातिदेशिकस्य प्राकरणिकत्वव्यावृत्तये सः । सत्यपि प्रकरणे विनिगमनाविरहेणैव नाङ्गताबोधो भवेदिति प्रतिबन्धकीभूतविनिगमनाविरहनिवृत्त्यर्थं फलवत्त्वविशेषणं, न तु तस्यापि प्रकरणशरीरत्वम् । तस्मादितिकर्तव्यताकाङ्क्षत्वमेव सन्निहितप्रतियोगिकं प्रकरणम् ।

न चैवमपि विकृतावुपहोमाकाङ्क्षया कल्पितायामितिकर्त-

व्यताकाङ्क्षायामपि प्रकरणत्वापत्तेर्लक्षणे(१) उत्थितत्वमप्याकाङ्क्षाविशेषणं देयमिति वाच्यम् । तस्य स्थानकल्पितस्य सत्यपि प्रकरणत्वे कल्प्यत्वेन शास्त्रे तत्त्वेन व्यवहाराभावेऽपि अलक्ष्यत्वाभावात् ।

न चैवमप्युक्तविधेतिकर्तव्यतात्वस्याङ्गत्वाघटकत्वात्कथमङ्गत्वे प्रामाण्यं तद्घटितप्रकरणस्येति वाच्यम् । भावनाकरणनिष्ठशक्तिजनकत्वस्य भावनाकारकत्वरूपतयाङ्गताघटकत्वात् । तदयमत्र बोधक्रमः—प्रधानगतेतिकर्तव्यताकाङ्क्षया प्रयाजादिगतप्रयोजनाकाङ्क्षासहकृतया प्रयाजवाक्यस्य प्रधानवाक्यस्य च स्वस्वावान्तरवाक्यार्थे समाप्तस्यापि महावाक्यैकदेशत्वरूपपदसन्निध्याख्यवाक्यकल्पनया सन्निहितपारिभाषिकपदानां च पदार्थोपस्थितिद्वारा तन्निष्ठाश्रुतपदान्तरकल्पनानुकूलयोग्यतानुमापकत्वाद्योग्यतारूपलिङ्गकल्पनया श्रुतेतिकर्तव्यतात्ववाचिपदरूपां श्रुतिं कल्पयित्वाऽङ्गत्वघटकीभूतेतिकर्तव्यतात्वरूपं कृतिकारकत्वं बोध्यत इति साङ्गत्वबोधे प्रमाणम् । वाक्यैकवाक्यत्वकल्पनाप्रकारश्च–समिधो यजति इत्थं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तस्मात्सिद्धं प्रकरणस्याप्यङ्गत्वे प्रमाणत्वम् ।

प्रयोजनं पूर्वपक्षे तुल्यन्यायतया विकृतेरपीतिकर्तव्यताकाङ्क्षाभावादतिदेशासिद्धिः । सिद्धान्ते तु तत्सिद्धिरिति द्रष्टव्यम् । विध्यन्ताधिकरणे तु आकाङ्क्षणीयालाभनिमित्तकाकाङ्क्षाशान्तिरिति पूर्वपक्षोत्थानाद्द्रष्टव्यम् ।

सूत्रे ऽसंयुक्तपदं प्रमाणान्तरसंयुक्तस्य प्रयोजनानाकाङ्क्षत्वात्प्रयाजगतप्रयोजनाकाङ्क्षारूपसहकारिकारणद्योतनार्थं सद्विषयपरम् । तच्चेतिकर्तव्यतात्मरूपात्प्रकरणादङ्गमिति शेषः ॥

इति चतुर्थं प्रकरणाधिकरणम् ॥ ४ ॥

---

१. उद्भूत ।

अथ पञ्चमं क्रमाधिकरणम् । (५)

सू—क्रमश्च देशसामान्यात् ॥३-३-१२॥ (सि)

(विषयसंशयसङ्गतयः)

अत्र क्रमाख्यस्य प्रमाणस्याक्षेपसमाधानम् । पूर्ववदेव पादाध्यायसङ्गतिः । अनन्तरा त्वस्य प्रकरणकल्पनया विनियोजकत्वात्तदुत्तरमारम्भ इति द्रष्टव्या ।

(पूर्वपक्षः)

तत्र क्रमो नाम सादेश्यस्थानापरपर्यायो द्विविधस्तत्राभिप्रेतः—अनुष्ठानसादेश्यं पाठसादेश्यं च । अन्त्यमपि द्वेधा—यथाक्रमपाठस्सन्निधिपाठश्च । त्रयमपीदमुभयाकाङ्क्षाङ्गमात्राकाङ्क्षा चेति । प्रधानाकाङ्क्षा चात्रेतिकर्तव्यताकाङ्क्षाभिन्नाकाङ्क्षा द्रष्टव्या । तस्याः प्रकरणत्वेन स्थानत्वाभावात् ।

न चास्य षड्विधस्यापि विनियोजकत्वं सम्भवति । तथा हि—न तावदनुष्ठानसादेश्यस्य तत्, पशुधर्माणां ह्यग्नीषोमीयाङ्गत्वावगमात्पूर्वमौपवसथ्येऽहन्येवानुष्ठानमित्यत्र प्रमाणमस्ति । सत्यपि तत्र पाठे प्रकरणेनानर्थक्यतदङ्गन्यायसहकृतेन पशुत्रयेऽप्यङ्गत्वावगमात्तेषां कालभेदेन तत्र तत्रानुष्ठानप्रतीतेः । न हि प्रयोजनावगमात्पूर्वमनुष्ठानावगतिः ।

अत एवान्यत्रापि विश्वजिन्न्यायेन स्वर्गकल्पनस्यैवापत्तेः नानुष्ठानसादेश्यस्मरणमस्ति । प्रधानाकाङ्क्षयाऽनुष्ठानसादेश्यं त्वन्यत्र सम्भाव्यमानमपि साक्षाद्वाक्यकल्पकत्वेनैव तस्योपपत्तौ प्रकरणकल्पकत्वे प्रमाणाभावान्न पञ्चमप्रमाणेऽन्तर्भवति । एतेनोभयाकाङ्क्षया पाठक्रमोऽपि व्याख्यातः ।

किञ्च यत्र ब्राह्मणे एकमेव प्रधानं संहितायां चैकमेव त-

दपेक्षितं याज्यानुवाक्यायुगलं तत्र वाचनिकाङ्गसन्दंशरूपाधिकारेणैव सन्निधिरूपेण तत्सिद्धेः सङ्कीर्णत्वम् । यत्राप्यनेकानि प्रधानानि तत्रापि सन्निधानरूपाधिकारस्य साधारणत्वेन सर्वेषां मन्त्राणां सर्वार्थत्वात् पाठक्रमस्यानिर्णायकत्वम् । न ह्यधिकारः पाठक्रमाद्दुर्बल इत्यत्र प्रमाणमस्ति, कल्पनाया(१)स्समत्वात्, प्रत्युत तस्यैवेतरनिष्ठाकाङ्क्षासन्निधिकार्यप्रतिबन्धकत्वस्य निष्प्रमाणकस्य कल्पनेन दुर्बलत्वाच्च केषामधिकार इत्येवं विशेषजिज्ञासाभावेन स्पष्टस्योपसंहाराविषयत्वाच्च । यत्र दर्शपूर्णमासादौ स्पष्टलिङ्गकयाज्याद्याम्नानेनैवाग्नेयादीनां नैराकाङ्क्ष्यं तत्र परिशेषादेवोपांशुयाजे साकाङ्क्ष(२)सन्निधिना याज्यानुवाक्यायुगलस्याङ्गत्वसिद्धेः कृतं पाठक्रमेण ।

एवं निराकाङ्क्षप्रधानसंनिधिस्थलेऽपि परिशेषादेवोपांशुयाजे 'दब्धिर्नामासी'त्यनुमन्त्रणमन्त्रस्यान्यतराकाङ्क्षासहकृताधिकारेण प्रधानाकाङ्क्षां परिकल्प्य विनियोगोपपत्तेः कृतं पाठक्रमेण ।

एवं संनिधिपाठोऽपि निराकर्तव्यः । साकाङ्क्षप्रधानस्थले तावत्सान्नाय्यसन्निधिपठितपात्रशुन्धनमन्त्रे साकाङ्क्षबुद्धिविपरिवृत्तिरूपाधिकारस्याग्नेयादिसाधारणत्वात् तस्य च पूर्वोक्तयुक्त्या "आनन्तर्यमचोदने"तिन्यायेन च प्रयाजादाविवाव्यवहितसन्निध्यपेक्षया प्राबल्यान्न केवलसान्नाय्याङ्गत्वम् ।

किञ्चात्र लिङ्गेनैव विनियोगान्न सन्निधेर्विनियोजकत्वम् । तस्य सामान्यसम्बन्धबोधकत्वेनाविनियोजकत्वात् । निराकाङ्क्षसन्निधिस्तु विकृतावुपहोमादेर्विनियोजकत्वेनोच्यमानो नैव युक्तः, विकृतेरितिकर्तव्यताकाङ्क्षाया जागरूकत्वात् ।

न च क्लृप्तप्रयोजनत्वेन प्राकृतैरेव तच्छान्तिः । प्रकृतौ याव-

---

१. स्समानत्वात् ।　　२ सन्निधानात् ।

त्प्रमाणप्रमितत्वेनेतिकर्तव्यताकाङ्क्षानिवर्तकत्वदर्शनादिहाप्युपहोमादिसहकृतानामेव तन्निवर्तकत्वात् ।

पार्थसारथिमते क्लृप्तप्रयोजनत्वस्याकिञ्चित्करत्वेन व्यापारसामान्यस्य विशेषापेक्षायां सन्निहितोपहोमानामेव तत्त्वेनान्वयोपपत्तावुभयाकाङ्क्षाया अध्याहृतत्वाच्च । तस्मान्न षड्विधस्यापि स्थानस्य विनियोजकत्वमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते-क्रमश्च षड्विधोऽपि स्थानापरपर्यायो विनियोजकः । तथाहि—

अनुष्ठानसादेश्यस्थले तावत्प्रकरणेन क्लृप्तप्रयोजनस्य दैक्षपशुयागस्याक्लृप्तप्रयोजनानां च पशुधर्मादीनां समानदेशेऽनुष्ठानादेव तेषां फलवदङ्गत्वम् ।

न च प्रमाणासिद्धिः । तदनुष्ठानक्रमनियामकस्याग्नीषोमप्रणयनविध्यनन्तरपाठस्य सत्त्वेन तदनन्तरमनुष्ठानावगमोपपत्तेः ।

यद्यपि च पाठस्य स्वविरोधफलवत्ताप्रतिसन्धाने सत्यनुष्ठाननियामकत्वं व्यभिचरितं तथापि तदप्रतिसंधानदशायामुत्पत्तिवाक्ये इष्टसामान्यस्य भाव्यत्वावगममात्रेणानुष्ठानावगतेः पाठस्य तन्नियामकत्वात्तदनुष्ठानसादेश्योपपत्तिः ।

वस्तुतस्त्वङ्गप्रयोगस्य प्रधानवाक्य एव विधेयत्वात्फलविशेषानवगमेऽनुष्ठानस्य दुरवगमत्वादेवं वाच्यम्—नाग्नीषोमप्रणयनस्य पशुधर्मैः क्रमः, भिन्नप्रयोगपरिग्रहस्य भावित्वात् । अपि त्व“ग्नीषोमाभ्यां प्रणीयाथ पशुतन्त्र”मित्यादिकल्पसूत्रानुसारेण श्रुतिवाक्यमपि क्त्वाप्रत्ययान्तमेवास्तीत्यवगम्यते । सोऽपि च कालविधिरेव । न त्वङ्गाङ्गिभावविधिः । पशुधर्माणां श्रुत्यादिभिः

पशुसंस्कारार्थत्वेन क्लृप्तप्रयोजनत्वात् ।

अस्तु चौपवसथ्येऽहनि पशुतन्त्रमिश्राकारिका श्रुतिः । सर्वथा कालस्य फलावगमनिरपेक्षस्यैव प्रयोगविधायित्वादनुष्ठानसादेश्योपपत्तिः ।

नन्वेवमपि पशुधर्माणां श्रुत्यादिभिरेवाङ्गत्वावगमान्नानुष्ठानसादेश्यस्य विनियोजकत्वम् । ये त्वारादुपकारकाः पशुपाकृताङ्गसन्दष्टास्तेषामवान्तरप्रकरणेनैवाग्नीषोमीयाङ्गत्वसिद्धेः नैव तस्य तत् । ये त्वप्राकृतपशुधर्मसन्दष्टा असंदष्टा एव वा, तेषां बलवता महाप्रकरणेन ज्योतिष्टोमाङ्गत्वस्यैवापातात्कृतमनुष्ठानसादेश्येनेति चेत्—

सत्यमेवम्–तथापि पशुधर्माणां तद्विधावपूर्वसाधनलक्षणातात्पर्यग्राहकतामात्रेण विनियोजकत्वव्यवहारो भाक्तो मूले ।

वास्तवं तूदाहरणमेवम्–यत्र फलवदेकं समाम्नातं स्थलान्तरे चानारभ्यविधयाऽफलमारादुपकारकं तयोश्चोभयोरपि वचनद्वयात्स्वतन्त्रैककालकर्तव्यता तत्र तस्याफलस्य फलवदङ्गत्वमनुष्ठानसादेश्यादिति ।

न च तत्राप्यफले विश्वजिन्न्यायादिसर्वप्रमाणाभाव एव तस्योदयात् । अत एव सिद्धमनुष्ठानसादेश्यस्य विनियोजकत्वं तच्च फलवतो दर्वीहोमत्वेनापूर्वत्वे उभयाकाङ्क्षया विकृतित्वे त्वन्यतराकाङ्क्षयेति ध्येयम् ।

एवं पाठक्रमोऽपि । लोके देवदत्तविष्णुमित्रयज्ञदत्तेभ्यो नीलपीतरक्तवस्त्राणि देयानीत्यादौ तेनान्वयदर्शनात् ।

न चाधिकारेण सङ्कीर्णत्वादसङ्कीर्णोदाहरणाभावः । सत्यपि चोपांशुयाजादौ याज्यानुवाक्यादेरनुमन्त्रणादेश्च परिशेषसिद्धाधिकारेणैवाङ्गत्वावगतिसिद्धावुदाहरणान्तरस्योपपत्तेः ।

परिशेषसिद्धिश्चाग्नेयादौ स्पष्टलिङ्गकयाज्यानुवाक्यानुमन्त्रणैरवरोधात्सुलभैवेति नात्रैवासङ्कीर्णत्वोपपादनाय यतितव्यम् ।

काम्ययाज्यानुवाक्यास्थले तु लिङ्गस्यैव विनियोजकत्वात्क्रमस्य चापूर्वविशेषसम्बन्धित्वलक्षणातात्पर्यग्राहकत्वमात्रत्वेन विनियोजकत्वं स्पष्टमेव । तस्मादीदृगुदाहरणं वाच्यम्—

यत्र विभिन्नफलकानेकप्रधानाम्नानं ब्राह्मणे, मन्त्रे च तेनैव क्रमेण जपादिमन्त्रोच्चारणविधानं तत्र तत्तद्विधीनां पाठक्रमेणैव तत्तत्प्रधानविध्युपस्थापकत्वात्तत्तत्प्रधानाङ्गता तत्तन्मन्त्रोच्चारणस्य पाठक्रमेणैव ।

न चात्राप्यधिकाराशङ्का । मन्त्रकाण्डे वाचनिकाङ्गसन्दंशाथशब्दाद्यभावेन तस्यानुद्भवात् ।

न चैवं मन्त्रपाठक्रमस्यापि नियमेन विवक्षितग्रन्थान्तरस्थप्रधानविध्युपस्थापकत्वे प्रमाणाभावादङ्गत्वानुपपत्तेः उच्चारणानां विश्वजिन्न्यायेन स्वर्गफलकत्वापत्तिः । आद्यमन्त्रोच्चारणविधितः पूर्वमाद्यप्रधानसम्बन्धितया वाचनिकान्तिमाङ्गाम्नानेन तदुत्तराम्नाताद्योच्चारणविधेर्द्वितीयप्रधानविध्युपस्थापकत्वोपपत्त्या तदुत्तरेषामपि तदुत्तरोपस्थापकत्वोपपत्तेः ।

अत एवाद्यस्यैव वाचनिकेनाधिकारात्तदङ्गत्वमेव सर्वेषामित्यनाशङ्क्यम् । वाचनिकस्यान्तिमत्वेन तदधिकारविच्छेदात् । अत्र जपादिमन्त्रोच्चारणस्यारादुपकारकत्वाल्लिङ्गादिविषयत्वाभावख्यापनायोदाहरणत्वम् । अत्रापि पूर्ववद्दर्वीहोमादिरूपत्वे । उभयाकाङ्क्षाविकृतिरूपत्वे त्वन्यतराकाङ्क्षेति द्रष्टव्यम् ।

एवं संनिधेरप्यधिकारापरपर्यायस्य विनियोजकत्वम् । स हि क्वचिद्वाचनिकाङ्गसन्दंशाथशब्दादिना विभाव्यते । क्वचित्तु विनैव फलवत्प्रधानविध्युत्तरं अफलस्याम्नानात् । तस्य च विनियोज-

कत्वोदाहरणं यद्यपि न शुन्धनमन्त्रः संभवति, तस्य लिङ्गविनियुक्तत्वेन संनिधानप्रमाणकाविनियोगाविषयत्वात्। अत एव तत्र पाठाव्यवहितसंनिधिरपूर्वविशेषलक्षणातात्पर्यग्राहक एव।

न च व्रीह्यादाविव बुद्धिविपरिवृत्तिरूपाधिकारेण गौणप्रकरणेन सर्वार्थत्वावगमान्नात्यन्तसंनिधेस्सान्नाय्यापूर्वमात्रसम्बन्धित्वलक्षणा तात्पर्यग्राहकत्वम्। गौणप्रकरणात् सर्वार्थत्वकल्पने आग्नेयादौ पात्रप्रोक्षणविध्यभावेन मान्त्रवर्णिकतत्क्रियाविधिकल्पनया तदापत्तेर्लाघवलिप्सया क्लृप्तो यत्र सान्नाय्ये तदीयपात्रे प्रोक्षणविधिः तत्रैव द्वारस्य क्लृप्तत्वेन निवेशौचित्यात्।

वस्तुतस्तु द्वारगतक्लृप्तत्वेन सान्नाय्यमात्रविषयत्वाङ्गीकारे पाठसंनिधानस्याकिञ्चित्करत्वापत्तेः आग्नेयादिपात्रप्रोक्षणस्यापि समाम्नानाच्च वाचनिकाङ्गसन्दंशगम्यावान्तराधिकारेण सांनाय्यमात्रविषयत्वं तस्य चाभिक्रमणन्यायेन महाधिकारापेक्षया शीघ्रोपस्थितिकत्वाद्बलवत्त्वं युक्तमेव।

वस्तुतस्तु तैत्तिरीयशाखायां पुरोडाशपात्रप्रोक्षणे पृथगेतस्यैव मन्त्रस्य पाठादुभयत्रापि मन्त्रस्संनिधिविनियोज्यस्तथाप्युपहोमानां विकृत्यङ्गत्वे संनिधिपाठस्योदाहरणत्वं तेषामुक्तप्रमाणातिरेकेणाविनियोगात्।

न च प्रकरणाद्विनियोगः, प्रथमावगतेन क्लृप्तोपकारप्राकृताङ्गसम्बन्धेनैवेतिकर्तव्यताकाङ्क्षाशान्तेः।

यद्यपि च प्रकृतौ वस्तुतो यावत्प्रमाणप्रमितानामिति कर्तव्यताकाङ्क्षाशामकत्वं दृष्टं तथापि न तत्त्वेन रूपेण तत्, अपि तु संहितप्रयाजादित्वेनैव, तेनैव रूपेण जनकतया क्रतूपकारोद्देशेन विहितत्वात्, अतश्च तादृशरूपस्य विकृतावपि सत्त्वान्न

प्रकरणोपपत्तिः ।

वस्तुतस्तु सहितत्वमपि न तन्त्रम्, अपितु प्रयाजादिजन्यादृष्टत्वमेव । तच्च साङ्गजन्यमेवेति प्रकृतौ साहित्यस्याप्यङ्गत्वान्न तद्विनैकैकेनाङ्गेन तत्सिद्धिः । गृहमेधीयादौ च आज्यभागयोः परप्रयुक्ताङ्गान्तरसाहित्यानाक्षेपकत्वेन स्वतस्तदनपेक्षत्वात्तद्विनैव साङ्गत्वोपपत्तेराकाङ्क्षाशामकत्वोपपत्तिः । विकृत्यन्तरे च प्राकृताङ्गमात्रेणोपहोमानन्वयेऽपि प्रकृतौ तेषामाकाङ्क्षाशामकत्वस्य क्लृप्तत्वाद्विकृत्याकाङ्क्षाशामकत्वं नानुपपन्नम् ।

अत एव तत्रोपहोमविधिं दृष्ट्वा तदन्यथानुपपत्त्यैव विकृतेराकाङ्क्षामुपजीव्य तेषां तदङ्गत्वेऽवगते तत्साहित्यस्याप्यङ्गत्वावगमान्न प्राकृताङ्गमात्रेण क्रतूपकारसिद्धिः । तस्माद्युक्तमिदमुदाहरणम् ।

उभयाकाङ्क्षया संनिधेर्विनियोजकत्वे तु यद्यपि नैवोदाहरणं संभवि । तादृशस्थले सर्वत्र योग्यतारूपलिङ्गस्यैव विनियोजकत्वात् तथापि तस्यापूर्वविशेषोपस्थापनादिना तदुपयोगित्वाद्विनियोजकत्वव्यवहार इति सिद्धं क्रमस्य विनियोजकत्वम् ।

क्रमसामान्यलक्षणं तु—इतिकर्तव्यतात्वेनायोग्यसम्बन्धयोर्वाक्यार्थयोरसंनिधिः । इतिकर्तव्यतात्वेनायोग्यत्वं द्वेधा—क्वचित्तदाकाङ्क्षाविरहात्, यथा विकृतौ । क्वचिदव्यापारात्मकत्वात्, यथाऽनुमन्त्रणजपादिमन्त्रादौ । अत्र चैकवाक्योपात्तव्रीहियागादिसंनिधेरपि तथात्वप्रसङ्गाद्वाक्यार्थेत्युक्तम् ।

प्रयाजाद्यङ्गवाक्यप्रधानवाक्यार्थयोरसंनिधौ स्थानत्वापत्तिनिरासार्थमाद्यविशेषणम् । अनुष्ठानसादेश्यसङ्ग्रहार्थमर्थपदग्रहणम् । अत्रारादुपकारकस्थले तावद्विकृसाकाङ्क्षाया एव कल्पनीयत्वात्प्रकरणकल्पनसापेक्षत्वम् । अनुमन्त्रणादिसिद्धपदार्थ

स्थले तु प्रधानाकाङ्क्षा तन्नियमादृष्टद्वारा चेतिकर्तव्यतात्वमिति द्वितयकल्पनसापेक्षत्वम् ।

अत एव सर्वेषु क्रमभेदेष्वयं विभागः निराकाङ्क्षानुष्ठानसादेश्यस्थले तावत्प्रधानाकाङ्क्षाया एव कल्पनीयत्वात्प्रकरणादौर्बल्यं स्पष्टमेव । साकाङ्क्षानुष्ठानसन्निधेस्त्वारादुपकारकस्थले यद्यपि न किञ्चित्कल्प्यं तथापि पाठसंनिधिमात्रघटितात्प्रकरणाद्दौर्बल्यं सुसम्पादमेव । विधिसंनिधानस्य पुरस्स्फूर्तिकतया तद्घटितप्रकरणस्य प्राबल्यात् ।

अत एव तादृशस्थलेऽन्यसमीपेऽनुष्ठीयमानस्यापि पाठसंनिहितफलवदङ्गत्वमेव । अनुष्ठानसंनिहितफलवतस्तु परं साकाङ्क्षत्वे प्रसङ्गेनोपकारः । अनयोस्तु द्विविधयोः परस्परविरोधे निराकाङ्क्षानुष्ठानसादेश्यस्य दौर्बल्यं स्पष्टमेव ।

एवं पाठसादेश्याद्द्विविधादप्यनुष्ठानसादेश्यस्य दौर्बल्यं पूर्वोक्तविधयानुसन्धेयम् ।

पाठसादेश्ययोस्तु परस्परं विरोधे यथाक्रमपाठस्य संनिधिपाठापेक्षया दौर्बल्यमेकग्रन्थस्थताघटितत्वेनेतरस्य प्राबल्यात् । भिन्नग्रन्थस्थसंनिधेस्तु वैपरीत्यम् । तस्मात्सिद्धं षड्विधस्यापि क्रमस्य विनियोगोपयोगित्वम् । सूत्रं प्रयोजनं च स्पष्टम् ॥

इति पञ्चमं क्रमाधिकरणम् ।

अथ षष्ठं समाख्याधिकरणम् ॥ ६ ॥

सू—आख्या चैवं तदर्थत्वात् ॥ ३–३–१३ ॥ (सि)

(विषयसंशयौ)

दर्शपूर्णमासादिषु याजुर्वैदिकपदार्थेष्वाध्वर्यवमिति समाख्या, आर्ग्वैदिकेषु हौत्रमिति समाख्या, सामवैदिकेष्वौद्गात्रमिति समाख्या वेद एव प्रयुक्ता। तथा होतृचमसः पौरोडाशिकमित्याद्यपि पात्रविशेषे दार्शपौर्णमासिकपदार्थेषु च वेद एव प्रयुक्ता। क्वचिच्च सोमचमस इत्याद्या याज्ञिकप्रयुक्ता लौकिकी। द्विविधापि सा न विनियोगे स्वतन्त्रं प्रमाणमित्याक्षिप्यते।

(सङ्गतिः)

पादाध्यायसङ्गती पूर्ववत्। अनन्तरा तु क्रमकल्पकत्वेन तत्सापेक्षत्वात्।

(पूर्वपक्षः)

तत्र समाख्या तावन्न यौगिकी अध्वर्युकर्तृकलौकिकपदार्थेषु प्रयोगाभावेनावयवार्थव्यभिचारात्। अतश्चाश्वकर्णपङ्कजादिशब्दवद्रूढा योगरूढा वेत्यङ्गीकर्तव्यम्।

न च रूढत्वेऽप्यपेक्षाबलादाध्वर्यवसमाख्यासादृश्येनाध्वर्युसमाख्योपस्थितेर्युक्तस्तया कर्तृनियम इति भर्तृमित्रादिमतं शङ्क्यम्। रूढशब्दसादृश्यमात्रेणोपदेशविषये नियमायोगात्। इतरथा सुतरां कण्वरथन्तरे रथन्तरधर्मातिदेशापत्तेः। अस्तु वारुणाधिकरणाद्युपपादितरीत्या कुत्रापि योगरूढ्यनङ्गीकारात्समाख्याया यौगिकत्वं तथापि नास्या स्वातन्त्र्येण मानत्वम्, विध्यभावेन पदार्थमात्रवाचिन्यास्समाख्याया विनियोजकत्वायोगात्।

यद्यपि चाप्राप्तार्थत्वेन तत्कल्पनया प्रयोगविध्येकवाक्यत्वेन वा तदुपपत्तिः तथाऽप्याध्वर्यवमित्यादौ प्रकृत्याध्वर्युस्तद्धितेन पदार्था अन्वाधानादयः । (१)कर्तृतादिरूपस्तु सम्बन्धो न कस्यचिद्वाच्य इति कथं तया तन्नियमसिद्धिः ।

यदि तु वैयाकरणवत्सम्बन्धसामान्येऽपि शक्तिरित्यभ्युपगम्यते तदापि विशेषलाभाभावस्तदवस्थ एव ।

किञ्चैवं पदश्रुत्यैव विनियोगोपपत्तेः कृतं समाख्यया । न हि 'सोमेन यजेते'त्यादौ समाख्यया यागस्य (२)करणत्वमिष्टम् ।

एतेन यद्यपि मीमांसकमते सम्बन्धस्य संसर्गविधया लक्षणया वा भानं तथापि न समाख्यायास्स्वातन्त्र्यम्, पदश्रुतिवदेव वाक्यविधया विनियोजकत्वोपपत्तेः । न ह्या'ग्नेयोऽष्टाकपाल'इत्यादावग्नेरष्टत्वादेर्वा विनियोगस्सामाख्यानिक इष्टः । अस्तु वा सा (३)स्वतन्त्रं मानं, तथापि कथं सा स्थानादिकल्पिका । प्रकृतिप्रत्ययाभ्यां स्वशक्यार्थस्य सम्बन्धसामान्यस्य चोपस्थितावाकाङ्क्षादिवशेन कर्तृतादिरूपसम्बन्धविशेषपरत्वप्रमापणोपपत्तेः । यापि हि लौकिकी समाख्या तस्यां श्रुतिन्यायेन मूलश्रुतिकल्पकत्वेऽपि न स्थानादिकल्पकत्वम् । वैदिक्यास्तु न तदपीति दुर्लभतरं षष्ठप्रमाणमिति प्राप्ते—

(सिद्धान्तः)

अभिधीयते—समाख्यापि षष्ठं प्रमाणम् । तथा हि—

सर्वत्र क्लृप्तावयवशक्तिकं पदं द्विविधं—प्रकृतविधौ वाक्यार्थान्वय्यवयवार्थकं तद्भिन्नं चेति । तत्राद्यं "निर्मन्थ्येनेष्टकाः पचन्ति" "प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ती"त्यादौ मन्थनप्रोक्षणादेः पाकावघाताद्यन्वयात्तत्र वाक्येनैव विनियोगः । द्वि-

१. कर्तृताख्यस्तु । २. फलकरणत्वं । ३. स्वातन्त्र्येण ।

तीयं 'त्वाध्वर्यवमधीते' 'प्रैतु होतुश्चमस'इत्याद्यन्यपरविधिमन्त्रार्थवादादौ । तत्राध्वर्य्वादेः कर्तुर्भक्षणस्य चाध्ययनादावनन्वयात्तत्र च विशेष्यमात्रस्य काण्डपात्रादेः प्रकृताक्रियान्वये जाते विशेष्ये विशेषणरूपावयवार्थोऽन्वयस्य सिद्धवन्निर्देशात्तदन्यथानुपपत्त्या अवयवार्थसम्बन्धबोधकं वाक्यमाकाङ्क्षायोग्यतादिवशेन कल्पयित्वा कर्तृतादिरूपस्सम्बन्धः प्रतीयते । तस्य च न वाक्यादिना प्रमाणान्तरेण सिद्धिरिति सिद्धस्सामाख्यानिको विनियोगः ।

यद्यपि चैतादृशे विषये विध्यन्तरानुपपत्तिसिद्धो मान्त्रवर्णिक आर्थवादिको वा कर्तृताविधिरित्यपि शक्यते व्यवहर्तुं तथापि तत्र यौगिकोपमान्यथानुपपत्तेरेव कारणत्वात्तयैव व्यवहारः । यत्र तु याज्ञिकप्रसिद्धिमात्रं तत्र विधेस्तदन्यथानुपपत्तिमात्रकल्पकत्वाद्युक्त एव तया व्यवहारः । अत्र च समाख्ययावयवार्थयोस्संसर्गविधादिना सम्बन्धे बुद्धे तन्निर्देशान्यथानुपपत्त्या न स्वतन्त्रविधिः कल्प्यते-अध्वर्युरन्वाधानादि कुर्यादिति; गौरवापत्तेः । अपि त्वन्वाधानादिवाक्यस्याध्वर्युं वृणीते इत्यध्वर्युवाक्यस्य चैकवाक्यतासम्पादकपदमात्रं–यमध्वर्युं वृणीते सोऽग्नीनन्वादधातीति । तच्च द्वयोर्विध्योः कथञ्चिदेकबुद्धिस्थतेत्येवंविधां स्थानकल्पनां विना न सम्भवतीति तत् कल्पयित्वा पूर्ववदेवाध्वर्योस्तन्नियमादृष्टद्वारेतिकर्तव्यतात्वं प्रकल्प्यान्वाधानस्य तदाकाङ्क्षारूपप्रकरणकल्पनया द्वयोर्विध्योर्महाविध्येकदेशत्वाख्यपदसंनिधिरूपं वाक्यं कल्प्यते । तश्चाध्वर्युमात्रनिष्ठं योग्यतारूपं लिङ्गं प्रकल्प्यैकवाक्यतासम्पादकपदरूपश्रुतिकल्पनाद्युक्तमस्याः षष्ठप्रमाणत्वम् ॥

प्रयोजनं रूढत्वसम्बन्धानवगमादिपूर्वपक्षेऽन्वाधानादावध्व-

र्योर्नियमाभावः। श्रुत्याद्यन्तर्भावपूर्वपक्षे स्थानाद्यपेक्षया प्राबल्यम्, सिद्धान्ते नेति द्रष्टव्यम्॥ सूत्रं स्पष्टम्॥

इति षष्ठं समाख्याधिकरणम्॥

अथ सप्तमं श्रुतिलिङ्गादीनां प्राबल्यदौर्बल्याधिकरणम्॥
(बलाबलाधिकरणम्)(७)

सू—श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ॥३-३-१४॥

तदेवं श्रुत्यादीनां षण्णां विनियोगहेतुत्वमुक्तम्। इहेदानीं तेषां समवाये कस्य दौर्बल्यमिति चिन्त्यते। समवायश्च विरोधे सत्येकविषयत्वम्, तद्यथा—प्रमाणानां विषयश्शेषः। स यत्रैको द्वयोः प्रमाणयोर्विरुद्धानेक(१)शेष्यन्वयित्वाच्च विरुध्यते, यथा—एकैवैन्द्री श्रुतिलिङ्गयोर्गार्हपत्येन्द्ररूप(२)शेष्यन्वयित्वात्। यत्र वा प्रमाणविषयशेषानेकत्वेऽपि शेषविषयीभूतशेष्येकत्वम्, यथा—एकस्मिन् गार्हपत्ये श्रुत्यैन्द्रीशेषः, लिङ्गाच्च तेनैव द्वारेण प्रकरणस्थाऽऽग्नेयी, तत्राऽपि शेषिण एव परम्परया कथञ्चित्प्रमाणाविषयत्वाद्विरुद्धानेकशेषान्वायितया च विरुद्धत्वात्समवायः। अयं च शेषसमवायत्वेनैव वार्तिके व्यवहृतः। अस्माभिस्तु सूत्रस्वारस्यात्प्रमाणसमवाय एव कथंचिद्व्यवह्रियते। अत्र च न विरोधमात्रं समवायस्य; सत्यपि विरोधेऽश्वमहिषादिवदेकविषयत्वाभावे बलाबलस्याभावात्।

---

१ विशेष्यान्वयाच्च। २. विशेष्यान्वयित्वात्।

नाप्येकविषयत्वमात्रम् । सत्यप्यरुणया क्रीणातीत्यादावारुण्यसाधनीभूतक्रयार्थत्वरूपैकार्थविषयत्वे श्रुतिवाक्यप्रकरणानां विरोधाभावेन तदभावात् ।

वस्तुतस्तु श्रुतेरेव तत्र विनियोजकत्वं, वाक्यप्रकरणयोस्तूद्देश्यविशेषणसमर्पणमात्र एव व्यापार इति नैकविषयत्वम् । अतश्च द्वयोः प्रमाणयोरेकविषयत्वमेव समवायशब्दार्थः । तत्र क्वचिदेकस्मिञ्छेषे द्वयोः प्रमाणयोर्विभिन्नशेषिविषयत्वेन ज्ञापकत्वात् । क्वचिच्च द्वयोश्शेषयोरैकरूप्येणैकशेषिविषयत्वेन ज्ञापकत्वात् । अत्र चैकरूप्यग्रहणं वैमृधप्रयाजादीनामेकदर्शपूर्णमासाख्यशेषिविषयत्वेन वाक्यप्रकरणज्ञाप्यत्वेऽपि न समवायः, द्वारैक्याभावात् । अस्मिंश्च स्थलद्वये प्रमाणयोः प्रबलदुर्बलभावे बाध एव । साम्ये त्वाद्ये समुच्चयः, द्वितीये विकल्प इति द्रष्टव्यम् ॥

यत्र त्वेकस्यैव शेषस्यैकशेषिविषयत्व एव प्रमाणद्वयं तत्र वैषम्ये प्रबलस्यैव विनियोजकत्वं न दुर्बलस्येति । तत्रापि नैकविषयत्वाख्यस्समवायः । अस्तु वा तत्रापि सः । प्रयोजनाभावाच्च न विचारविषयः । साम्ये त्वेकस्यैव विनियोजकत्वमितरस्य तु पुनश्श्रुतित्वेन प्रयोजनान्तरकल्पनम् । विनिगमकाभावे तु द्वयोरप्यभ्युदयशिरस्कत्वकल्पनया विनियोजकत्वं कर्मान्तरत्वकल्पनया विषयभेद एव वेति द्रष्टव्यम् ॥

तदिह यथैव विनियोजकप्रमाणानां समवाये बलाबलं चिन्त्यते, तथा सामान्यसम्बन्धबोधकप्रमाणानामुद्देश्यविशेषलक्षणातात्पर्यग्राहकाणां च परस्परं समवायेऽपि बलाबलं चिन्तनीयम् । इदं च तत्र तत्र प्रकटीकरिष्यते । तदिह वाक्यादिप्रमाणदौर्बल्यस्य तावत्तद्गम्यविनियोगापवादोपयोगित्वात्पादाध्यायसङ्गतिस्स्पष्टैव । दौर्बल्यं च प्रतियोगिप्रमाणगतप्राबल्य-

सापेक्षमिति तन्निरूपणमर्थसिद्धम् ।

एवं च श्रुतिलिङ्गयोः श्रुत्योर्लिङ्गयोश्च परस्परविरोधे बलाबलविचारः प्रासङ्गिक इति नातीव तत्र पादसङ्गतौ यतितव्यम् । तत्र शेष्यनेकत्वे तावच्छ्रुत्योः श्रुतिलिङ्गयोश्चेदमुदाहरणम्—

(श्रुतिलिङ्गविरोधोदाहरणम्)

अग्नौ "कदाचन स्तरीरसीत्यैन्द्र्या गार्हपत्यमुपातिष्ठते" इति श्रुतम् । तत्रायं मन्त्रः किं तद्धितश्रुत्या लिङ्गेन चेन्द्राङ्गमपि ? किं वा तृतीयया गार्हपत्यस्यैवाङ्गमिति सन्देहः ।

न चास्य विचारस्य प्रासङ्गिकत्वे कथं प्रथमतः कर्तव्यता ? पादसङ्गतस्य विचारस्यैव प्रथमतः कर्तव्यत्वौचित्यादिति वाच्यम् । वाक्यापेक्षया श्रुतिप्राबल्यस्य पूर्वनिराकरणीयत्वेऽपि श्रुतेः श्रुत्यपेक्षया लिङ्गापेक्षया च प्राबल्ये सिद्धे वाक्यापेक्षया तस्य सुखोपपादत्वेनास्य विचारस्य प्राथम्योपपत्तेः ।

अनन्तरा तु पूर्वप्रमाणस्वरूपेऽवगते तद्गतबलाबलविचारोदयात् स्पष्टा ।

तत्र तृतीयाश्रुत्या तावदयं मन्त्रो गार्हपत्याङ्गमित्यविवादमेव ।

न चात्र मन्त्रविशिष्टोपस्थानस्य गार्हपत्याङ्गत्वेन विधानादारुण्यादिवन्मन्त्रस्य धात्वर्थाङ्गत्वमेव तया भवेन्न गार्हपत्याङ्गत्वमिति वाच्यम् । अभिधानस्य मन्त्रसामर्थ्यबलेन समीपस्थितेश्चामन्त्रणविभक्तिबलेन प्राप्तत्वादिह लाघवेन गार्हपत्योद्देशेन मन्त्रमात्रस्यैवेन्द्रियकामवाक्यवत् विधेयत्वात् । अतश्च युक्तमेव तृतीयया तदङ्गत्वेन विनियोगः । द्वितीयायाः श्रुतित्वपक्षे च तथापि सः । इन्द्राङ्गत्वमपि च तद्धितश्रुत्या । स हि प्राधान्येन प्रकाश्यत्वरूपं देवतात्वं वदन्मन्त्रं प्रतीन्द्रस्य प्राधान्यमभिधत्त इति अङ्गत्वघटकीभूतपरोद्देश्यतावाचित्वाद्युक्त एव तद्धितश्रुत्या

पदश्रुत्या वेन्द्राङ्गत्वेन विनियोगः । न हि(१) कारकविभक्तेरेव कश्चिदधिको विशेषः ।

न चेन्द्रस्य चयने विनियोगाभावादनुद्देश्यत्वं, तत्र विनियोगाभावेऽपि तदङ्गभूतेन्द्रदेवत्ये ऽविहितमन्त्रके होमे इन्द्रस्योपयोगसम्भवेनोद्देश्यत्वोपपत्तेः । अतश्च समुच्चयेनैवोभयाङ्गत्वम्, प्रतिप्रधानं गुणावृत्तेर्युक्तत्वेन विकल्पस्याप्रसक्तत्वात् । वस्तुतस्तूपक्रमस्थत्वात्तद्धितश्रुतेरेव प्राबल्यमिति प्राप्ते--

प्राधान्येन प्रकाश्यत्वस्य तद्धितार्थत्वेऽपि प्राधान्यस्य विशेष्यतया तद्धितादनुपस्थितेर्न तस्य वस्तुतो मुख्यश्रुतित्वलक्षणाक्रान्तत्वम् । प्राधान्यमपि च नाङ्गत्वघटकीभूतेप्सितत्वाख्यं तदर्थः, अपि तु भावनावच्छाब्दबोधे विशेष्यत्वमात्रम् । अतश्चोक्तप्राधान्येनेप्सितत्वाख्यं तल्लक्षयित्वा विनियोगस्तद्धितश्रुत्या बोध्येतेति कारकश्रुतितो दौर्बल्यम् । अन्यानि च दौर्बल्यकारणान्यैन्द्र्याधिकरण एव निरूपितानि ।

न चैवं तेन पौनरुक्त्यम् । तत्र गौणसामर्थ्यस्य श्रुतिसहायत्वमात्रनिरूपणात् । तत्सिद्धं श्रुत्योर्विरोधे कारकश्रुतेर्बलीयस्त्वमिति ॥

तथा कारकश्रुत्योरपि विरोधे 'आग्नेयं चतुर्धा करोति' 'पुरोडाशं चतुर्धा करोती'त्यादौ बलाबलं सामान्यविशेषभावादिना द्रष्टव्यम् ।

तथा शेषानेकत्वे विजातीयश्रुत्योर्विरोधे 'सोमेन यजेते'त्यादौ पदश्रुत्यपेक्षया कारकश्रुतेरुपजीवकत्वेन दौर्बल्यं भावार्थाधिकरणे व्याख्यातम् । समानजातीयश्रुत्योर्विरोधे एकस्मिन्नेव पदहोमे सप्तमीश्रुत्या पदेनाहवनीयस्य बाधः ।

१. विभक्तावेव कश्चिदधिकः ।

तदेवं श्रुत्योर्विरोधे बलाबलं वर्णितम् ।

श्रुतिलिङ्गविरोधे तूभयोरपि समबलत्वमेवेत्याशङ्कते--

तथाहि-मन्त्रे इन्द्रपदस्य मुख्यसामर्थ्यादिन्द्राङ्गत्वयोग्यतारूपं लिङ्गं तावत्प्रत्यक्षमेव ।

न च तस्याङ्गत्ववाचिपदरूपश्रुतिकल्पनसापेक्षत्वेन दुर्बलत्वम् । तत्कल्पनं विनापि तस्यास्तदङ्गत्वबोधकत्वोपपत्तेः । अतश्चोभयोरपि तुल्यबलत्वात्प्रतिप्रधानावृत्तेन्र्याय्यत्वेनोभयोरपि समुच्चयेनाङ्गता । अस्ति चात्र सामान्यसम्बन्धबोधकं प्रकरणम् । इन्द्रस्य च विनियोगः पूर्ववदेव द्रष्टव्यः ।

किञ्च यद्यपि लिङ्गस्य श्रुतिकल्पकत्वं भवेत् तथाप्यवगतेऽपि मन्त्रस्य गार्हपत्याङ्गत्वे इन्द्रस्य स्मारकाकाङ्क्षयैव सहकृतं लिङ्गं मन्त्रस्येन्द्राङ्गताबोधकम् । इष्यत एव हि प्रबलप्रमाणावगतप्रकृतिसम्बन्धस्यापि प्रयाजादेरन्यतराकांक्षयैव विकृतिसम्बन्धित्वम् ।

न चोपायान्तराक्षेपेण स्मारकाकाङ्क्षाशान्तिः । विकृतावपि दृष्टार्थाङ्गविषये तुल्यत्वात् ।

किञ्च श्रुतेरप्यसमर्थविनियोगायोगेनास्त्येव स्वावगताङ्गतापर्यवसानार्थं गौणसामर्थ्यापेक्षा । तस्य च मुख्यसामर्थ्योपजीवित्वेन श्रुतेरपि स्वपर्यवसानार्थं मुख्यसामर्थ्योपजीवित्वात्तस्य प्राबल्यमेवावगम्यते । अतश्चैन्द्र्यधिकरणपूर्वपक्षन्यायेन कथञ्चिच्छ्रुतिरेव व्याख्येया । सर्वथा न गार्हपत्यमात्राङ्गमयं मन्त्र इति प्राप्ते—

अभिधीयते-न तावल्लिङ्गं(१) स्वत एव प्रमाणं 'वेदोऽखिलो धर्ममूल'मिति स्मृत्या वेदस्यैव क्लृप्तस्यानुमानिकस्य वा

१. स्वतः प्रमाणं,

धर्मबोधकत्वनियमादर्थाध्याहारनिराकरणाच्च ।

किञ्च विहितत्वघटितमङ्गत्वं न विधिकल्पनां विना निर्वहति । स च लिङादिशब्दैकगम्य इत्यवश्यं लिङादिशब्दस्तावत् कल्पनीय एव । अतश्च शब्दोपस्थितस्यैव शब्देनान्वयात्कृतिकारकत्वादिवाचकस्यापि पदस्य कल्पनेति न लिङ्गं स्वतः प्रमाणम् । अत एवाङ्गत्ववाचिपदकल्पनानुकूला योग्यता श्रुतपदार्थनिष्ठा लिङ्गमिष्टमित्युक्तम् ।

किञ्च यद्यप्यङ्गत्वकल्पनानुकूलैव सा लिङ्गमित्याश्रित्य लिङ्गं श्रुतिं च कल्पयेत्तथापि श्रुतिस्थले श्रावणप्रत्यक्षेण विधिवाक्येऽवगते झटित्येवाङ्गत्वरूपार्थावगतिः । लिङ्गस्थले तु प्रत्यक्षेण मन्त्रपदेऽवगते तेन शक्यार्थावगमोत्तरं तदङ्गत्वयोग्यताज्ञानात्तदङ्गत्वप्रतीतिरिति दौर्बल्यम् ।

यत्त्ववगतेऽपि श्रुत्या विनियोगे इन्द्रस्य स्मारकापेक्षयैवास्य विनियोग इति, तन्न स्मारकाकांक्षाया अविशेषोपस्थितध्यानाद्युपायान्तराक्षेपेणापि निवृत्तिसिद्धेः एतन्मन्त्रनियमे प्रमाणाभावात् । विकृतिस्थले तु देवतारूपाङ्गापेक्षाया आक्षेपेणानिवृत्तेः सादृश्यविशेषोपस्थितप्राकृताङ्गनियमो नायुक्तः ।

यदपि श्रुतेरप्यसमर्थविनियोगायोगेन सामर्थ्यापेक्षणमित्युक्तं तद्योग्यतानिश्चयस्य श्रुतशब्दजन्यशाब्दबोधे कारणत्वाभावादयोग्यतानिश्चयाभावमात्रेण श्रौतविनियोगोपपत्तेः उत्तरकालं तदपेक्षायामपि विनियोगप्रमारूपे कार्येऽविप्रकर्षाभावाल्लिङ्गोपजीवित्वाभावेन परास्तम् । तस्मात् श्रुत्यैव गार्हपत्याङ्गत्वेन मन्त्रविनियोगः ।

नन्वङ्गत्वं नाम परोद्देशप्रवृत्तकृतिकारकत्वेन विहितत्वम् । तत्र परोद्देश्यताकृतिकारकत्वयोश्श्रौतत्वेऽपि परस्परसमभिव्याहृ-

तगार्हपत्यप्रातिपदिकगम्यत्वेन वाक्यीयत्वाल्लिङ्गविरोधस्य तत्कृतत्वेन श्रुतिकृतत्वाभावात्कथमत्र लिङ्गं बाध्यमिति चेत्—न; एवमपि विधिवाक्यत्वेन तस्य मन्त्रगतलिङ्गापेक्षया प्राबल्यात् । वक्ष्यते हि 'यद्यप्यन्यदेवत्यः पशु'रित्यादौ तत् ।

वस्तुतस्तु यथैव नायं केवलश्रुतिविरोधः, एवं न केवलवाक्यविरोधोऽपि । गार्हपत्यपदसमभिव्याहारस्यैन्द्र्यधिकरणपूर्वपक्षन्यायेन समीपस्थितिविशेषणत्वादिनाप्युपपत्तेः । अतश्चायमुभयविरोधोऽपि सन् कृतिकारकत्वादेर्भावनान्वयितया प्राधान्यात्तद्बोधकतृतीयादेरपि प्राधान्यावगतेः 'प्रधानेन व्यपदेशा भवन्ती'ति न्यायात् श्रुतिविरोध एवेति भण्यते, न वाक्यविरोधः । अत एव यत्र वाक्यमेव परस्य कृतिकारकत्वादेश्च गमकं तत्रैव तद्विनियोगस्तेन प्रमाणान्तरविरोधश्च । प्रकृते तु केवलं श्रुतिलिङ्गविरोध एवेति युक्तस्तया तस्य बाधः । बाध्यलिङ्गविषयोऽपि चात्र केवलमिन्द्रपदमेव । अवशिष्टपदानां तु तदेकवाक्यतयेन्द्राङ्गत्वाच्च तद्विषयत्वम् । अतश्च तदंशे श्रुतिवाक्यविरोध एव ।

वस्तुतस्तु श्रुत्यैन्द्रपदस्य गार्हपत्याङ्गत्वे प्रमापिते अवशिष्टपदानां तदेकवाक्यतया गार्हपत्याङ्गत्वस्यैवापत्तेर्न तदंशे श्रुतेर्व्यापार इति सा वस्तुतस्तात्पर्यगत्यैन्द्रपदमात्रविषयिण्येवेति ध्येयम् ॥

एवमेकस्मिञ्छेषिणि शेषानेकत्वस्य श्रुतिलिङ्गविरोधोदाहरणं—एकस्मिञ्छेषिणि गार्हपत्ये चयनाधेयतासम्पत्त्यर्थं स्मरणापेक्षे प्रकरणपठितासंयुक्ताग्नेय्या लिङ्गेन प्राप्नुवन्त्याः श्रुतिप्राप्तैन्द्र्या बाध इति द्रष्टव्यम् । तदा चाग्नेयीमन्त्रस्य सामान्यसम्बन्धसत्त्वेऽन्यत्राप्युत्कर्षः, नो चेज्जपादौ विनियोग इति ध्येयम् ॥

(श्रुतिवाक्यविरोधोदाहरणम्)

श्रुतिवाक्ययोर्विरोधे-'आग्नेय' इत्यादौ सम्बन्धसामान्ये तद्धितमभ्युपगम्य वाक्यादग्नेरष्टाकपालाङ्गत्वं श्रुत्या देवतातद्धितत्त्वादवगतेन यागाङ्गत्वेन बाध्यते। सर्वत्र चोत्तरोत्तरप्रमाणस्य पूर्वपूर्वप्रमाणकल्पकत्वावश्यकत्वस्य तत्तत्स्वरूपनिरूपणावसर एवोक्तत्वाद्दौर्बल्यम्। वार्तिके त्वारुण्यस्य वाक्यीयमेकहायन्यङ्गत्वं श्रौतेन क्रयाङ्गत्वेन बाध्यत इत्युक्तम्। तदेकहायनीसम्बन्धस्याव्युत्पन्नत्वादव्युत्पन्नपदसन्निधेर्वाक्यत्वानुपपत्तेरुपेक्षितम्।

शेषानेकत्वे तु क्रमप्रकरणादिनाग्निष्टोमस्तोत्राङ्गतामापन्नगिरापदव्यतिरिक्तप्रगाथैकवाक्यतापन्नगिरापदस्यापि तदेकवाक्यत्वेनाङ्गत्वप्रसक्तौ 'ऐरं कृत्वोद्गेय'मिति विकारार्थतद्धितश्रुत्या इरापदविधानम्।

यद्यपि नेयं मुख्या श्रुतिस्तथापि गौणश्रुतेरेवोदाहरणम्। मुख्यश्रुतेस्त्वन्यन्मृग्यम्।

वस्तुतस्तु गिरापदव्यतिरिक्तप्रगाथस्यैव गिरापदस्यापि तेनैव प्रमाणेन स्तोत्राङ्गत्वोपपत्तेर्नायमेकान्तेन श्रुतिवाक्यविरोधः। किन्तु यत्र तद्व्यतिरिक्तपदानां लिङ्गेन स्वार्थाङ्गत्वं तस्य च देवस्य त्वादिपदवद्वाक्येनैवेतरपदार्थाङ्गत्वं तत्र तत्स्थाने पदान्तरस्य श्रुत्या विधाने द्रष्टव्यम्।

(श्रुतिप्रकरणविरोधोदाहरणम्)

श्रुतिप्रकरणविरोधे—एकविंशत्याद्यनुवचनानां प्रकरणाद्दर्शाद्यङ्गत्वप्रसक्तौ प्रतिष्ठाकामस्येति गौणषष्ठीश्रुत्या पुरुषार्थत्वम्। द्वादशाहीनस्येति न श्रुतिप्रकरणविरोधोदाहरणम्। अपि तु श्रुतिक्रमविरोधोदाहरणमेव, द्वादशत्वस्य सिद्धरूपत्वेन प्रकरणाविषयत्वात्।

यत्त्वत्र राणककारेण प्राकृताङ्गानुवादेन विधानादस्यापि प्रकरणविषयत्वमित्युक्तम्। तदहीने उपसदामातिदेशिकत्वेऽपि ज्योतिष्टोमे औपदेशिकत्वात्तदनुवादेन विहितस्य द्वादशत्वस्य ज्योतिष्टोमप्रकरणविषयत्वानुपपत्तेरुपेक्षितम्।

शेषानेकत्वे तु प्रतिष्ठाकामदर्शपूर्णमासप्रयोगे प्रकरणात्पाञ्चदश्यानुवचनेऽङ्गत्वेन प्रसक्ते षष्ठीश्रुत्यैकविंशत्यनुवचनविधानम्। यद्यपि चात्र नित्यानुवचनस्याग्निसमिन्धनाङ्गत्वमेव वास्तवम्, न तु दर्शाद्यपूर्वीयप्रयोगाङ्गत्वमपि; तस्योद्देश्यतावच्छेदकत्वेनान्यथासिद्धेः। प्रतिष्ठाकामीयत्वं तु नोद्देश्यतावच्छेदकमपि।

एवं काम्यानुवचनस्यापि श्रुत्या प्रतिष्ठाङ्गत्वमेव, न तु तत्कामीयदर्शादिप्रयोगाङ्गत्वं प्रमाणाभावात्, तथापि सम्बन्धमात्रेऽङ्गत्वमुपचर्य वार्तिककारेणोदाहृतमित्युदाहृतम्। वस्तुतस्तु युक्तमुदाहरणमूह्यम्। एवमन्यत्रापि द्रष्टव्यम्॥

(श्रुतिक्रमविरोधोदाहरणम् ।)

श्रुतिक्रमविरोधे—परिव्याणादियूपधर्माणामनुष्ठानसादेश्यादग्नीषोमीयाङ्गत्वे तदीययूपाङ्गत्वे वा प्रसक्ते द्वितीयाश्रुत्या यूपसंस्कारार्थत्वावगमात् यूपस्वरूपे चानर्थक्याभावेनापूर्वसाधनत्वलक्षणातात्पर्यग्राहकदुर्बलप्रमाणापेक्षाया अभावादनुवादस्य संनिहितगामित्वासिद्ध्यर्थं तदपेक्षणेऽपि च यूपस्योपदेशातिदेशाभ्यामवगताङ्गभावस्याप्यग्नीषोमीयप्रयोगान्तःपातोत्पत्तित्वाभावेन भिन्नकालानुष्ठितस्य ज्योतिष्टोमसम्बन्धिसर्वपशुयागार्थं व्यक्तिसाधारण्यावगतेस्तदुद्देशेन विहितानां परिव्याणादीनां सर्वपशुयागसम्बन्धियूपाङ्गत्वमिति तान्युदाहरणम्। एवं 'रशनया यूपं परिव्ययती'त्यनेनोक्तयूपकर्मकपरिव्याणोद्देशेन विहिताया रशनाया अपि सर्वसम्बन्धिपरिव्याणाङ्गत्वम्। तद्धर्माणां च दर्भमयत्वा-

दीनां तादृशरशनाङ्गत्वम् ।

न च परिव्याणादीनामग्नीषोमीयपशुमात्रसम्बन्धियूपाङ्गत्वेऽपि पश्वन्तरेऽतिदेशेन प्राप्त्युपपत्तेर्यूपस्यैकत्वेन च सकृदनुष्ठितानामेव प्रसङ्गेन सिध्युपपत्तेः सर्वसम्बन्धे फलाभावः। परिव्याणे फलाभावेऽपि रशनाविधौ द्वितीयान्तयूपपदसमभिव्याहारमहिम्नैतद्यूपसम्बन्धिपरिव्याणत्वावच्छेदेन रशनातद्धर्मविधानात् सवनीयपश्वर्थापूर्वपरिव्याणान्तरेऽपि रशनातद्धर्मप्राप्तिरूपफलसत्त्वात्। सवनीये हि "आश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययती"ति परिव्याणं कालविशेषे विहितम्। तच्च न सर्वार्थम्। एतद्वाक्ये यूपस्वरूपे आनर्थक्येना'ग्निं संमार्ष्टी'तिवदपूर्वसाधनलक्षणार्थमनुष्ठानसादेश्यापेक्षणेन सवनीयार्थत्वस्यैवावगतेः प्रकृतकार्यस्य सिद्धत्वाच्च न तदर्थमपि। अतश्चापूर्वे तस्मिन्नपि रशनातद्धर्मप्राप्तिः फलम्। प्रकारान्तरं चाग्रे निरूपयिष्यते। एवं यथाक्रमपाठस्य सन्निधौ पाठस्य च श्रुतिविरोधे उदाहरणमूह्यम्।

शेषानेकत्वे तु संनिधानात् पशुकामसाध्यप्रणयनप्रयोगे च सिद्धरूपस्य चमसस्य प्रसक्तौ श्रौतेन गोदोहनेन बाधः। इदमपि च श्रुतिप्रकरणविरोधवत् सम्बन्धमात्रे विरोधादुदाहृतम्।

(श्रुतिसमाख्ययोर्विरोधोदाहरणम्।)

श्रुतिसमाख्ययोर्विरोधे पौरोडाशिकमिति समाख्याते काण्डे समाम्नात 'इषे त्वे'त्ययं मन्त्रः समाख्यया पुरोडाशाङ्गत्वेन प्रसक्तः "इषे त्वेति शाखां छिनत्ती"तीतिकरणाख्यगौणश्रुत्या शाखाच्छेदनाङ्गत्वेन विनियुज्यते।

न चात्राधिकाराख्यप्रकरणेन साक्षाद्यागाङ्गत्वावगतेरयं श्रुतिक्रमविरोधः। यागस्य स्पष्टलिङ्गकमन्त्रान्तरावरुद्धत्वेनास्य साक्षात्तत्रानन्वये आनर्थक्यतदङ्गन्यायेनाङ्गेषु प्रसक्तौ सप्ता-

ख्यानुरोधेन पुरोडाशाङ्गतोपपत्तेः । अत एवोपजीव्यसमाख्यानुरोधेन क्रमसङ्कोचः ।

अथवा यत्रानारभ्याधीते मन्त्रे क्रतुविशेषाङ्गत्वबोधिका समाख्या तत्रान्यक्रत्वङ्गत्वे श्रुत्यन्तरमूह्यम् । शेषानेकत्वे तु हौत्रसमाख्यातायां क्रतुयाजयाज्यायां समाख्यया होतरि प्रसक्ते यजमानस्य याज्येति गौणषष्ठीश्रुत्या यजमानः कर्तेत्युदाहार्यम् । तस्मात्सिद्धं श्रुतेः स्वोत्तरेभ्यः प्राबल्यम् ॥

(द्वयोर्लिङ्गयोर्विरोधे उदाहरणम्)

एवं लिङ्गस्यापि लिङ्गेन विरोधे–मन्त्राणां गौणसामर्थ्येन गौणार्थाङ्गत्वे प्रसक्ते मुख्यसामर्थ्येन मुख्यार्थाङ्गत्वम् । शेषानेकत्वे त्वेकस्मिञ्छेषिणि गौणमुख्यसामर्थ्येन मन्त्रद्वयमुदाहार्यम् ॥

(लिङ्गवाक्यविरोधोदाहरणम्)

लिङ्गस्य वाक्येन विरोधे तु "स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान" इति मन्त्रः पूर्वोत्तरार्धयोरेकत्र संनिधानात्मकेन वाक्येन सदनमात्राङ्गत्वेन प्रसक्तो लिङ्गेन पूर्वार्धं सदने उत्तरार्धं च सादन इत्येवं विभज्य विनियुज्यते ।

न चात्र भिन्नप्रतीतिविषयानेकमुख्यविशेष्यराहित्यरूपैकार्थ्यस्याख्यातभेदेनाभावादेकवाक्यत्वाप्रसक्तेः कथं लिङ्गेन तस्य बाध इति वाच्यम् । प्रतीतितः ऐकार्थ्याभावेऽपि तच्छब्दस्य पूर्वसापेक्षत्वेन 'ये यज्ञपतिं वर्धानि'त्यादौ यच्छब्दस्येव विभज्यमानसाकाङ्क्षत्वात्तन्मात्रेणैव तद्द्वेवार्थैकत्वमपि प्रकल्प्य एकवाक्यत्वोपपत्तेः । शक्यते ह्याख्यातोपात्ताया अपि भावनाया भावनान्तरे प्रकारतया साकाङ्क्षत्वे सत्यन्वयः 'पश्य मृगो धावती'त्यादिवत्कल्पयितुम् । अत एवाख्यातस्योत्सर्गतो मुख्यविशेष्यतयैव

स्वार्थप्रतिपादकत्वेऽपि साकाङ्क्षस्थले प्रकारतया तत्कल्पनमपि नातीव दोषाय ।

अत एव प्रकारत्वेन स्वार्थबोधकल्पनाप्यसञ्जातविरोधित्वादाकाङ्क्षोत्थापकतच्छब्दश्रवणाभावाच्च न पूर्वाख्याते । अपि त्वीदृशं सदनकरणं यस्य क्वचित्प्रतिष्ठापनं साध्यमित्येवमुत्तरभावनाया एव प्रकारत्वकल्पनादुत्तराख्यात एव ।

एवं च सदनकरणे पूर्वार्धस्य लिङ्गेनैव विनियोगेऽप्युत्तरार्धस्य देवस्य त्वादिपदस्य निर्वापादिपदैकवाक्यतया निर्वाप इव पूर्वार्धैकवाक्यतया सदनकरणे विनियोगो नानुपपन्नः ।

नन्वेवं वाक्यस्य प्रसक्तावपि कथं लिङ्गेन तद्बाधः ? यावता देवस्य त्वादिपदवदस्यापि पृथक्प्रयोगे साकाङ्क्षत्वेनानर्थक्यप्रसङ्ग इति चेत्—तच्छब्दो हि पूर्वप्रसिद्धिमात्रमपेक्षते, न तु वाक्यीयां पूर्वप्रसिद्धिम्, प्रकरणप्रसिद्ध्यापि लोके तद्दर्शनात् । वेदेऽपि 'तप्ते पयसि दध्यानयती'ति वाक्यान्तरप्रापितस्य पयस 'सा वैश्वदेवी'ति तच्छब्देन परामर्शाच्च । यच्छब्द एव हि तच्छब्दार्थं स्ववाक्योपस्थितं नियमेनापेक्षते 'येन कर्मणेर्त्सेत्तत्र जयाञ्जुहुया'दित्यादौ तथैव व्युत्पत्तिदर्शनात्, न तु तच्छब्दोऽपि । अतश्च तच्छब्दस्य स्ववाक्योपस्थितमात्रपरामर्शित्वनियमाभावाद्विभज्यमानसाकाङ्क्षत्वाभावेनार्थैकत्वकल्पनानुपपत्तेः युक्तो लिङ्गमात्रेण पुरोडाशसादन एवोत्तरार्धस्य विनियोगः ।

एवं सत्यपि देवस्य वेत्यादिपदस्यानर्थक्यं पृथक् प्रयोगे भवेत् ततो भवेदप्युत्तरार्धस्य सदने विनियोगः । लिङ्गावगतापूर्वसाधनीभूतपुरोडाशसादनार्थत्वेन सुतरां सार्थक्यात् । तस्मात्सिद्धमुत्तरार्धस्य लिङ्गात्सादनाङ्गत्वमेव, न तु वाक्यात्सदनाङ्गत्वमिति ।

अत्र च सर्वत्रोत्तरोत्तरप्रमाणस्य पूर्वपूर्वप्रमाणकल्पनाप्रकारस्स-

र्थोऽपि तत्तत्प्रमाणस्वरूपनिरूपणावसरे एव प्रपञ्चित इति नेह पृथक्प्रपञ्च्यते। शेषानेकत्वे त्वेकस्मिन्नेव सदनकरणे शेषिणि वाक्यादुत्तरार्धस्यापि शेषत्वे प्रसक्ते लिङ्गादपूर्वार्धस्यैव तदितीदमेव भङ्ग्यन्तरेण द्रष्टव्यम्।

यत्त्वत्र वार्तिककृतोदाहरणान्तरमुक्तं–'होता यक्षन्मित्रावरुणौ प्रशास्तारौ प्रशास्तादहुना सोमं पिबतां प्रशास्तर्यजेति प्रैषपाठस्य 'मैत्रावरुणः प्रेष्यति चानुचाहे'ति वाक्येन मैत्रावरुणकर्तृकत्वे प्रसक्ते स्वात्मनि प्रशास्तृशब्दवाच्ये मैत्रावरुणे स्वस्यैव प्रैषासम्भवाल्लिङ्गेनान्यकर्तृकत्वम्, तत्रा 'पीतरमन्यस्तेषां यतो विशेषस्स्या'दिति न्यायेनाच्छावाके प्राप्ते सामान्यसमाख्यया होतुरेव लिङ्गेन प्रतिप्रसव इति; तद्ब्राह्मणवाक्यस्य मन्त्रलिङ्गेन बाधायोगादुपेक्षितम्। न हि मन्त्रलिङ्गं तदपेक्षया प्रबलम्, मन्त्रस्य ब्राह्मणविहितार्थप्रकाशकत्वेन तत्परतन्त्रत्वात्। अन्यथा मनोतामन्त्रस्यापि सामान्यसम्बन्धग्राहिप्रमाणसत्त्वेन लिङ्गात्सवनीयाङ्गत्वापत्तौ "यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्ये"ति वाक्यावगताग्नीषोमीयाङ्गत्वबाधापत्तेः। न हीयं श्रुतिः, येन लिङ्गं बाधेत। अन्यदेवत्यपशुशेषत्वस्य समभिव्याहारगम्यत्वात् तेनात्र श्रौतत्वोक्तिरपि वार्तिककारीया नातीवादर्तव्या। यथा च नास्य वाक्यस्य वापव्यादिपशावूहनिवर्तकत्वं तस्य प्रकृतावन्यायनिगदत्वेनाप्रसक्तत्वात्, किं तूत्कर्षनिवर्तकत्वमेव, तथा मन्त्राधिकरण एव प्रपञ्चितम्, दशमे चोपपादयिष्यते। अतश्च ब्राह्मणवाक्यस्य मन्त्रलिङ्गेन बाधायोगान्नेदमुदाहरणं लिङ्गवाक्यविरोधे सङ्गच्छते।

कथं तर्ह्यस्य प्रैषस्य होतृकर्तृकत्वसिद्धिः? उच्यते–दुर्बलस्यापि प्रमाणस्य विशेषविषयत्वे तेन प्रबलस्यापि सामान्य-

विषयस्य सङ्कोच इष्टः । 'यस्मिन्देशे मृगः कृष्ण' इत्यादि स्मृत्या क्रतुस्मृतिश्रुतिसङ्कोचस्य प्रमेयबलाबलवत्त्वन्यायेन साधितत्वात् । तदिहापि ब्राह्मणवाक्यस्य सामान्यविषयत्वान्मन्त्रलिङ्गस्य विशेषविषयत्वेन बाधकता, न तु लिङ्गत्वेनेति नेदं लिङ्गवाक्योदाहरणं, न वा प्रैषस्य होतृकर्तृकत्वासिद्धिः ।

न च होतुः प्रैषपाठकर्तृत्वे प्रैषार्थस्य याज्यामन्त्रपाठस्य मैत्रावरुणकर्तृकत्वापत्तेर्होता यक्षदिति मन्त्रोपक्रमे होतुर्याज्यामन्त्रपाठकर्तृत्वलिङ्गानुपपत्तिः । तत्रत्यहोतृशब्दस्या'थ कस्माद्धोतृभ्यस्सञ्ज्यो होत्रंशसस्तुभ्यो होता यक्षदिति प्रेष्यतीति पृष्ट्वा "प्राणो वै होता प्राणस्सर्वर्त्विज, इति प्रतिवचनकरणाद्गौण्या वृत्त्या मैत्रावरुणपरत्वतात्पर्यावगतेः ।

(लिङ्गप्रकरणविरोधोदाहरणम्)

लिङ्गप्रकरणविरोधे तु—पूषानुमन्त्रणमन्त्रस्य प्रकरणेन दर्शपूर्णमासयोर्विनियोगे प्राप्ते समाख्यासहकृतलिङ्गात्पूषदेवत्यकर्माङ्गत्वम् । इदं च सिद्धरूपत्वान्मन्त्रस्याधिकाराख्यप्रकरणविरोधे ज्ञेयम् । मुख्यप्रकरणविरोधे त्वन्यदूह्यम । एवमग्रेऽपि । शेषानेकत्वे तु पूषानुमन्त्रण एव प्रकरणादाग्नेये प्राप्ते मुख्यलिङ्गकेनानुमन्त्रणेन बाधः ।

(लिङ्गक्रमविरोधोदाहणम्)

लिङ्गक्रमविरोधे—'उपहूत उपह्वयस्वे'त्यनयोर्यथाक्रमं पाठात्प्रश्नप्रतिवचनशेषत्वे क्रमेणावगते लिङ्गाद्वैपरीत्यम् । एवं क्रमान्तरविरोधेऽपि द्रष्टव्यम् । शेषानेकत्वे त्वन्यदेवत्याविकृतिसन्निधावन्यदेवत्यानुमन्त्रणस्याम्नातस्य तद्देवत्यानुमन्त्रणेन बाधः ।

(लिङ्गसमाख्याविरोधोदाहरणम्)

लिङ्गसमाख्याविरोधे—मनो ऋचः पृथुवाजवत्योश्च क्रमस-

हकृतयाज्यासमाख्यया (१)सोमारौद्रयागे याज्यात्वे प्रसक्ते ऽग्निप्रकाशनलिङ्गात्क्रमसहकृतात्तदीये सामिधेनीकार्ये निवेश इति ॥ शेषानेकत्वे तु(२) मनोर्ऋचामेव सोमारौद्रयागे याज्यात्वप्रसक्तौ तद्देवत्ययाज्यानुवाक्याभ्यां लिङ्गप्राप्ताभ्यां बाधः ।

(वाक्ययोर्विरोधोदाहरणम्)

वाक्ययोर्विरोधे–उपांशुत्वस्य "त्सरा वा एषा यज्ञस्ये"ति व्यवेतयज्ञपदैकवाक्यत्वाद्यज्ञभागधर्मत्वं "तस्माद्यत्किञ्चिदग्नीषोमीयात्तेनोपांशु चरन्ती"त्यनेन सन्निहितयत्किञ्चित्पदैकवाक्यतयावगतपदार्थधर्मत्वेन बाध्यते । शेषानेकत्वे तु 'पञ्चदश सामिधेनीरनुब्रूयात्, सप्तदश वैश्यस्ये'ति ।

(वाक्यप्रकरणयोर्विरोधोदाहरणम्)

वाक्यप्रकरणयोर्विरोधे–पूषानुमन्त्रणमन्त्रगतस्या'हं देवयज्यया पुष्टिमान् भूयास'मिति पदसमुदायस्य प्रकरणाद्दर्शाद्यङ्गत्वे प्रसक्ते पूषपदैकवाक्यत्वात्पूषदेवत्यकर्माङ्गत्वम् । तथा श्रुतिविनियुक्तस्यापि सूक्तवाकस्योपजीव्येन लिङ्गेनेष्टदेवताप्रकाशनार्थत्वस्थापनात्तदनुरोधेन पौर्णमास्यामग्नीषोमादिपदानि, अमावास्यायाश्चैन्द्राग्न्यादिपदानि विभज्य प्रयोज्यानीत्यस्यापि स्थापितत्वादग्नीषोमपदैकवाक्यतापन्नाना'मिदं हविरजुषेता' मित्यादीनाममावास्यायां प्रयोगः, इन्द्राग्न्यादिपदैकवाक्यतापन्नानां चे'दं हवि'रित्यादीनां पौर्णमास्यां प्रयोग इत्येवं प्रकरणादिदं हविरजुष-

---

१. तैत्तिरीयसंहितायां द्वितीयकाण्डे द्वितीयप्रपाठके दशमानुवाके "यो ब्रह्मवर्चसकामः स्यात् तस्मा एतꣳ सोमारौद्रं चरुं निर्वपेत्" इति वाक्यविहितो यागः सोमारौद्रयागः ।

२. तै.सं.का.१–प्र.८. द्वाविंशेऽनुवाके "प्र बाहवा सिसृतं" इत्यृचोऽनन्तरं "अग्निं वः पूर्व्यं गिरा देवं" इत्याद्या याष्षडृच आम्नाताः ताः मनोर्ऋच इत्युच्यन्ते ।

तेत्यस्य द्विरावृत्तिप्रसक्तौ तत्तद्देवतापदैकवाक्यतया विभज्य विनियोग इति। तत्र च मन्त्रपदानां सिद्धरूपत्वात् श्रुतिविनियुक्तत्वाच्च मुख्यप्रकरणविषयत्वाभावेऽप्यधिकाराख्यप्रकरणस्याङ्गताबोधकतयाऽपूर्वसाधनलक्षणातात्पर्यग्राहकतयैतद्विषयेऽपि प्रसक्तत्वाद्युक्तो वाक्येन बाधः।

मुख्यप्रकरणोदाहरणं तु वैमृधस्य प्रयाजादिवद्दर्शाङ्गत्वप्रसक्तौ वाक्येन पौर्णमासमात्राङ्गत्वमिति। यथा चात्र प्रकरणं वाक्यस्यापि कल्पकं तथा तत्स्वरूपनिरूपणप्रसङ्ग एव निरूपितम्। पौर्णमासांशे तु प्रकरणं सदपि दुर्बलत्वादनुवादः। शेषानेकत्वे तु वेदिकरणवृत्तिहविरभिवासनोत्तरत्वस्याधिकाराख्यप्रकरणान्मुख्यप्रकरणादेव वा दर्शाङ्गत्वे सिद्धे 'पूर्वेद्युरमावास्याया'मित्यनेन पूर्वेद्युः कालः। न हि सप्तम्याः प्राधान्यमर्थः, येनात्र श्रुतित्वं शंक्येत अधिकरणत्वमात्रस्य तदर्थत्वात्। अत एव सप्तम्यन्तस्थले शेषत्वमेव श्रौतं न तु शेषित्वम्॥

(वाक्यक्रमविरोधोदाहरणम्)

वाक्यक्रमयोर्विरोधे—परिव्याणकरणक्रियमाणानुवादिमन्त्रगतपरिवीरसिपरिवीतपदयोः लिङ्गादेवाग्नीषोमीयक्रमबाधेन यावत्परिव्याणशेषत्वेऽवगते तदेकवाक्यतापन्नपदान्तराणां तथैव क्रमबाधेन वाक्यात् सवनीयपरिव्याणार्थत्वम्। शेषानेकत्वे तु "वृषा पवस्व धारये"ति राजन्यस्य प्रतिपदं कुर्या"दिति इतिकरणरूपगौणश्रुत्याऽऽद्यपादमात्रस्यैव विनियोगाद्द्वितीयमारभ्य यथाक्रमपाठेन नित्यप्रातिपद्द्वितीयादिपादप्रसक्तौ नैमित्तिकप्रातिपदाद्यपादैकवाक्यतापन्नद्वितीयादिपदानां वाक्येन प्राप्तिः॥

(वाक्यसमाख्याविरोधोदाहरणम्)

वाक्यसमाख्ययोर्विरोधे——भक्षानुवाकगतसख्यासमित्यादे-

लिङ्गाद्ग्रहणादौ विनियोगेऽवगते तदेकवाक्यतापन्नशेषपदानां समाख्यया भक्षाङ्गत्वप्रसक्तौ वाक्याद्ग्रहणाद्यङ्गत्वमिति । शेषानेकत्वे तु प्रैषानुवचने समाख्यया होतृप्राप्तेर्वाक्येन मैत्रावरुणविधानमिति ॥

(प्रकरणयोर्विरोधोदाहरणम्)

प्रकरणयोर्विरोधे—अभिक्रमणादेर्महाप्रकरणा(१)द्दर्शपूर्णमासाङ्गत्वप्रसक्तौ प्रयाजाङ्गत्वमवान्तरप्रकरणात् । शेषानेकत्वे तु यत्रानेकसमुदाये महाप्रकरणादेकधर्मप्राप्तिरवान्तरप्रकरणाच्च तद्विरुद्धधर्माणां, तादृशस्थलमूह्यम् ।

(प्रकरणक्रमयोर्विरोधोदाहरणम्)

प्रकरणक्रमयोर्विरोधे—अनेकेष्टिपशुसोमयागात्मके राजसूयेऽभिषेचनीयो नाम सोमयागः । तत्संनिधा“वक्षैर्दीव्यती”त्यादिना विदेवनाद्ययागरूपमाम्नातम् । तस्य चायागत्वादेव राजसूयफलसम्बन्धे बाधितेऽङ्गत्वावश्यम्भावेन संनिधिलक्षणक्रमादभिषेचनीयमात्राङ्गत्वप्रसक्तौ प्रकरणाद्राजसूययागाङ्गत्वम् ।

न चाभिषेचनीयस्यापि फलवत्त्वेनाप्रतिबन्धाकाङ्क्षत्वादवान्तरप्रकरणोपपत्तेर्वैपरीत्यशङ्का । तस्य विकृतित्वेन प्राकृताङ्गैरेव परिपूर्णत्वात्तदनुपपत्तेः ।

ननु विकृतावपि क्वचिदस्त्येव प्रकरणं यत्र प्राकृताङ्गानुवादेन प्राकृतकार्यापन्नमपूर्वं वाङ्गं विधीयते, यथा—शराः, पृषत्ता चानूयाजेषु । तत्र हि निरङ्गाङ्गस्यैव प्राकृताङ्गस्य विकृत्या ग्रहणे साकाङ्क्षत्वानिवृत्तेरङ्गस्यापि प्राकृताङ्गग्रहणसमय एव ग्रहणम् । अस्तु वा प्राकृताङ्गानुवादेन विहितापूर्वाङ्गस्थले उपहोमादिवत्सन्निधाना-

१. दर्शपूर्णमासाङ्गत्वमवान्तरप्रकरणाद्बाध्यते ।

देव ग्रहणं तथापि प्राकृतकार्यापन्नाङ्गस्थले तावद्युक्तमेव प्राकृताङ्गग्रहणसमये ग्रहणम् ।

यद्यपि चात्र वाक्यीय एव विनियोगः, तथाप्यनिवृत्ताकाङ्क्षायामेव विकृत्या ग्रहणान्मूले प्रकरणविनियोज्यत्वव्यवहारः ।

यत्तु तादृशाङ्गसन्दंशपतितमसंयुक्तं क्रियारूपं च तद्विकृतौ प्रकरणेनैव ग्राह्यम्, अनयोश्च सन्निहितप्रतियोगितेतिकर्तव्यताकाङ्क्षया अनिवृत्तत्वात् ।

यदपि चासंयुक्तं नोक्तविधप्राकृताङ्गसम्बन्धपङ्गसन्दष्टम्, अपि तु प्रधानोत्तरमुक्तविधाङ्गात्पूर्वं समाम्नातं तदपि प्रकरणेनैव गृह्यते । उक्तहेतोस्तत्राप्यविशिष्टत्वात् । अतश्च प्रकृतेऽपि प्राकृतमाहेन्द्रस्तोत्रानुवादेन 'माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते' इति वाक्यविहितादभिषेकात्पूर्वमभिषेचनीयोत्तरं विदेवनादीनां पाठात्तेषां प्रकरणग्राह्यत्वोपपत्तिरिति चेत्--

सत्यप्यभिषेकस्य माहेन्द्रस्तोत्राङ्गत्वे तस्याप्राकृतकार्यापन्नत्वेन भवदुक्तरीत्यैव प्रकरणग्राह्यत्वाभावात्तत्पूर्वभाविनामपि प्रकरणग्राह्यत्वानुपपत्तेः ।

वस्तुतस्त्वभिषेचनीयान्तिमप्राकृताङ्गसम्बन्धिवैकृतगुणविध्युत्तरकालं विदेवनादीनामभिषेकस्य चाम्नानात्तादृशोत्पत्तिविधौ च माहेन्द्रस्याश्रवणेन तस्य माहेन्द्राङ्गत्वानुपपत्तिः ।

न चोत्पत्तिवाक्ये तदङ्गत्वाश्रवणेऽपि संनिधिप्रकरणं च बाधित्वा वाक्यान्तरेण तदङ्गत्वोपपत्तिः । तद्वाक्यस्य प्रतिशब्दयोगेनाभिषेके माहेन्द्रस्तोत्रकालतामात्रविधायकत्वेन स्तोत्राङ्गताविधायकत्वाभावात् । एवं सत्यपि यद्ययमेवाभिषेकविधिस्यात् ततो बृहस्पतिसवादिवदार्थादेतदुन्नीतेन वाक्येन भवेदपि तदङ्गत्वं, न त्वेतदस्तीत्युक्तम् । अतश्चोत्पत्तिवाक्य

एव प्रयोजनजिज्ञासायां सन्निधानात्प्रकरणाद्वा प्रयोजनस्यावगमान्माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यत इति कालार्थ एव संयोग इति वक्ष्यते । तेनाभिषेकस्यापूर्वत्वविधयापि माहेन्द्रस्तोत्राङ्गत्वाभावात्तत्पूर्वभाविनां विदेवनादीनामाभिषेचनीयप्रकरणविनियोज्यत्वशङ्कानुपपत्तेस्संनिधानादनुष्ठानसादेश्याद्वाभिषेचनीयाङ्गत्वं वाच्यम् । तच्च दुर्बलं प्रकरणात् । तेन हि विदेवनाद्यभिषेकान्तानां राजसूयाङ्गत्वमवगम्यते ।

ननु राजसूयो नाम न कश्चिदर्थान्तरम् । अपि त्विष्टिपशुसोमयागा एव । ते च सर्वे प्रत्येकं विकृतित्वान्निराकाङ्क्षा एवेति न प्रकरणं तस्येति चेत्—न प्रत्येकजन्यपरमापूर्वाणां प्राकृतैरङ्गैर्निराकाङ्क्षेऽपि सर्वयागजन्यैकपरमापूर्वस्य साकाङ्क्षत्वात्तज्जननानुकूलप्रत्येकापूर्वनिष्ठयोग्यतासम्पादकत्वेन प्रकरणग्राह्यत्वोपपत्तेः ।

वस्तुतस्तु तादृशपरमापूर्वानङ्गीकारेऽपि पवित्रादारभ्य क्षत्रस्य धृतिं यावद्विधिषु 'राजसूयाय ह्येना उत्पुनाती'त्यनेनोपक्रमात् "राजसूयेनेजानस्सर्वमायुरेती"त्युपसंहाराद्वाचनिकाङ्गसन्दर्शनेन राजसूयत्वेन रूपेण सर्वेषामेवाकाङ्क्षोन्नीतेति सर्वप्रकरणोपपत्तिः अत एव विदेवनादीनामारादुपकारकत्वात्तत्काले तन्त्रेणानुष्ठानावगतेः प्रकृतौ क्रमबाधफलालाभेऽपि नामातिदेशेन पवित्रादिविकारे विदेवनादिधर्मप्राप्तिरूपफलोपपत्तिः ।

एवं प्रकरणस्य यथाक्रमपाठेनापि विरोधे उदाहरणं मृग्यम् ।

शेषानेकत्वे तु यथाक्रमं पाठाद्विरापदस्याग्नीषोमस्तोत्राङ्गत्वप्रसक्तावधिकाराख्यप्रकरणादिरापदस्य तदङ्गत्वमिति । उदाहरणान्तरं वा यथापेक्षितमूह्यम् ।

(प्रकरणसमाख्ययोर्विरोधोदाहरणम्)

प्रकरणसमाख्ययोर्विरोधे—पौरोडाशिकसमाख्यया प्रयाजा·

दीनां पुरोडाशाङ्गत्वे तत्साध्याग्नेयादियागमात्राङ्गत्वे वा प्रसक्ते प्रकरणस्थयागाङ्गत्वमिति । शेषानेकत्वे तु यथोचितमूह्यम् ॥

(क्रमयोर्विरोधोदाहरणम्)

क्रमयोर्विरोधे—काम्ययाज्यानुवाक्याकाण्डे संनिधिलक्षणक्रमाद्द्वयोरैन्द्राग्नयोर्याज्याद्वयेऽप्यनियमेन प्राप्ते यथाक्रमं पाठनात्यन्तप्रधानप्रत्यासन्नत्वात्क्रमेण विनियोग इति ।

यद्यपि च क्रमाधिकरणे एकग्रन्थस्थसंनिध्यपेक्षया यथाक्रमं पाठस्य दौर्बल्यमुक्तं तथापि प्रकृते तस्य भिन्नग्रन्थस्थत्वात्तदपेक्षया पाठस्य प्राबल्याविरोधः । क्रमान्तरस्य तु परस्परबलाबलं तत्रैवोक्तम् । उदाहरणं तूह्यम् ।

एवं शेषानेकत्वेऽपीदमेवोदाहरणं 'स्योनं त' इति मन्त्रद्वयोज्यम् । क्रमान्तरे तूह्यम् ।

(क्रमसमाख्याविरोधोदाहरणम्)

क्रमसमाख्ययोर्विरोधे पौरोडाशिकसमाख्याते काण्डे समाम्नातस्य मन्त्रस्य "शुन्धध्वं दैव्याय कर्मणे देवयज्यायै" इत्यादेस्समाख्यया पुरोडाशाङ्गत्वे तत्साध्याग्नेयादियागीयपात्रप्रोक्षणाङ्गत्वे प्रसक्तेऽवान्तरसंनिधानात्सान्नाय्यापूर्वसाधनीभूतत्वप्रमापणेन तदीयपात्रप्रोक्षणाङ्गत्वम् । तथा चात्र महाधिकाराख्यगौणप्रकरणेन समाख्यां संनिधिं च बाधित्वा न सर्वसम्बन्धिपात्राङ्गत्वं तथा क्रमाधिकरण एव व्युत्पादितम् । यथा च समाख्यास्थानादिकल्पिका तथा समाख्याधिकरणे ।

एवं क्रमान्तरैस्समाख्याविरोधेऽप्युदाहरण मूह्यम् । शेषानेकत्वे तु यथोचितमसङ्कीर्णमूह्यम् ।

(समाख्ययोर्विरोधोदाहरणम्)

एवं समाख्ययोरपि सामान्यविशेषभावादिना विरोधः शेष्यनेकत्वे शेषानेकत्वे च चोदाहर्तव्यः ।

(श्रुत्यादीनां प्राबल्यदौर्बल्ये क्वचित्वैपरीत्यमपि)

एवं तावच्छ्रुत्यादीनां पूर्वपूर्वस्य प्राबल्यमुक्तम् । क्वचिच्च विपरीतमपि तत् । तथा पूर्वपूर्वस्यानुमानिकत्वे उत्तरोत्तरस्य च प्रत्यक्षत्वे। अत एव वैदिकमन्यार्थदर्शनरूपमनन्यथासिद्धं लिङ्गं स्मृत्यनुमितश्रुत्यपेक्षया प्रबलम् स्मृतेर्मूलान्तरस्यापि सम्भावितत्वादन्यार्थदर्शनस्याप्यन्यथानुपपत्तिविधया लिङ्गत्वाच्च । अत्र च मातुलकन्यापरिणयनस्यानुदाहरणत्वेऽप्यन्यदुदाहरणमूह्यम् ।

यत्र च दुर्बलस्यापि प्रमाणस्यात्यन्तमानर्थक्यं विषयाभावात्तत्र प्रबलस्यापि सङ्कोचरूपं बाधमङ्गीकृत्य दुर्बलस्य प्राबल्यम् , यथा वषट्कारनिमित्तभक्षादेः प्रबलेन श्रुत्यादिना प्रतिपाद्यावच्छेदेन प्राप्तस्य यजमानचमस इति समाख्यया विषयान्तरं प्रतिपद्यमानाया यजमानकर्तृकभक्षान्तरस्य सोमसंस्कारार्थत्वेन विधानात्प्रतिपाद्यसोमैकदेशसंस्कारकत्वं वक्ष्यते ।

अत एव पूर्वोक्तबाधविषयाणां दुर्बलप्रमाणानामस्ति कश्चिद्विषय इति युक्तस्तथा बाधः ।

तथाहि–पौरोडाशिकं हौत्रमित्यादिसमाख्यायास्तावत्सामान्यविषयत्वाच्छुन्धनमन्त्रादिव्यतिरिक्तविषयत्वेनाप्युपपत्तिः क्रमप्रकरणवाक्यानां च पारायणाद्युपयोगितयापि क्वचिदाग्नेयोऽष्टाकपाल इत्यादौ पार्ष्ठिकान्वयविषयत्वेनापि वाक्यस्योपपत्तिः। लिङ्गं तु गौणीवृत्त्युपयोगशक्यार्थप्रतिपादनेनोपयुज्यत एव ।

एवं यत्र प्रबलप्रमाणस्याविशेषप्रवृत्तावानर्थक्यं गौरवं वा यथा–व्रीहीन्प्रोक्षती'त्यादौ 'स्रुवेणावद्यती'त्यादौ तत्र व्रीहिस्वरूपार्थत्वे आनर्थक्यमवदानमात्रार्थत्वे चायसावष्टम्भादियोग्यताकल्पना गौरवमिति तत्र प्रकरणेन स्वाभाविकयोग्यतया च दुर्बलयापि सङ्कोचः प्रबलस्येति ।

(प्राप्ताप्राप्तबाधभेदनिरूपणम्)

ननु लिङ्गादेर्मन्थरप्रवृत्तिकत्वेन श्रुतिसत्वेऽङ्गताबोधकत्वानुपपत्तेः अप्रसक्तस्य च विनियोगस्य कथं बाध इति चेत्-सत्यम्। अत एवास्याप्राप्तबाधत्वमिति वदन्ति। तत्त्वं चाङ्गताबोधकलिङ्गादिकल्प्यश्रुतिकल्पनप्रतिबन्धकत्वं श्रुत्या हि गार्हपत्याङ्गत्वे मन्त्रस्य प्रमिते निराकाङ्क्षत्वाल्लिङ्गेन श्रुतिकल्पनानुपपत्तेरिन्द्राङ्गत्वमप्राप्तमेव।

एवं दाशमिकोऽपि क्वचिदप्राप्तबाधः। यथा-गृहमेधीये "आज्यभागौ यजती"त्यनेन प्रयाजादीनां तत्प्रापकप्रमाणकल्पनप्रतिबन्धकत्वात्। यत्र तु प्रापकप्रमाणं क्लृप्तं तत्र प्राप्तबाधः, यथासामान्यशास्त्रस्य विशेषशास्त्रेण।

ननु यदि सामान्यशास्त्रेण पदेऽप्याहवनीय इत्यवगतं तदा कथं तस्य बाधः? न ह्यत्र नेदं रजतमित्यादिवन्मिथ्यात्वबोधरूपो बाधस्सम्भवति सामान्यशास्त्रस्यापि निर्दुष्टत्वेन तज्जन्यबोधस्य दोषाजन्यतया तस्य मिथ्यात्वायोगात्।

न च करणनिष्ठदोषाभावेऽपि वस्तुतः करणे विशेषविषयातिरिक्तविषयक एव शेषादर्शनकृतप्रमादरूपप्रमातृदोषेण प्रमातुः भ्रमरूपतद्विषयकत्वबोधोपपत्तेर्विशेषदर्शनेन तन्मिथ्यात्वोपपत्तिरिति वाच्यम्। एतादृशप्राप्तबाधस्य श्रुतिलिङ्गादिष्वपि संभवात्। तत्रापि हि गार्हपत्याङ्गतारूपविशेषादर्शने प्रमातुर्लिङ्गमात्रदर्शनेन श्रुतिकल्पनद्वारेन्द्राङ्गताविषयकत्वभ्रमस्य सम्भवात्। अतस्सर्वत्रैव प्राप्तबाधत्वमिति चेत्-न; प्राप्तबाधत्वं नाम क्लृप्तस्य बोधकस्य विशेषविषयताप्रतिबन्धकत्वम्। न चैतच्छ्रुतिलिङ्गादिषु सम्भवति। तत्र बोधिकाया लिङ्गकल्प्यश्रुतेर्नियमेनाकल्पितत्वात्कदाचित्कल्पिताया अपि प्रत्यक्षश्रुत्या

तस्या एव मिथ्यात्वकल्पनाच्च। सामान्यशास्त्रस्य तु क्लृप्तत्वेनाकल्पनीयत्वाद्धोमान्तरे आहवनीयाभावापत्त्या च तन्मिथ्यात्वकल्पनस्याप्ययोगात्क्लृप्तस्य तस्य विशेषशास्त्रेण स्वविषयाविषयता प्रतिबन्धमात्रं क्रियत इति सोऽयमप्राप्तबाधः। एवं च सामान्यशास्त्रं विशेषविषयातिरिक्तविषयं परिशेषात्सम्पद्यते। एवमुपदेशातिदेशनित्यनैमित्तिकपौर्वापर्यादिबाधेष्वपि द्रष्टव्यम्। अत एव तार्तीयोऽप्राप्तबाध इत्युत्सर्गमात्रम्।

नन्वर्थलोपप्रत्याम्नानादिबाधेषु भवेदप्येवं निषेधरूपवाचनिकबाधस्थले तु न प्रापकशास्त्रस्य स्वविषयता प्रतिबध्यते। निषेधस्य निषेध्यप्राप्तिसापेक्षत्वेन प्रापकशास्त्रस्य तद्विषयत्वावश्यंभावात्।

न च तत्र भ्रान्तिप्राप्तं निषिध्यत इति शक्यं वक्तुम्। प्रापकशास्त्रस्य वस्तुतस्तदतिरिक्तविषयकत्वे भ्रमासंभवात्। तथा हि–पदशास्त्रं पदं विधाय चरितार्थं नाहवनीयशास्त्रमपेक्षते। अतश्च येन पदशास्त्रं प्रथमतो दृष्टं तस्य पश्चादवगम्यमानेन सामान्यशास्त्रेण न भ्रमः, न वा विशेष दर्शनात्तन्निवृत्तिः विशेषादर्शनाभावे भ्रमकारणाभावात्।

अत एव तदा सामान्यशास्त्रं तद्व्यतिरिक्तविषयतां झटित्येव प्रतिपद्यते। येन तु सामान्यशास्त्रं पूर्वमाकलितं तस्य सामग्रीसत्त्वाद्भ्रमो जायत इति तन्निवृत्तिर्विशेषदर्शनजन्या। अत एव तत्र तद्व्यतिरिक्तविषयत्वं सामान्यशास्त्रस्य पश्चादेवावगम्यते, न तु प्रथमावगमकाले। बाधश्च तत्र विशेषशास्त्रफलं, न तु वाक्यार्थः। प्रकृते तु बाधो "न तौ पशौ करोती"ति सामान्यशास्त्रस्यैवार्थो न तु फलं, विधेयान्तराभावात्। अतश्च येन तावदतिदेशशास्त्रमेव प्रथमत आलोचितं तस्यास्तु नाम विशेषादर्शनसहकृतप्रापकशास्त्रा-

दाज्यभागयोरपि भ्रान्तां प्राप्तिमालोच्य निषेधशास्त्रार्थावगमोपपत्तेः पश्चाद्विशेषदर्शने सति प्रापकशास्त्रस्य तद्व्यतिरिक्तविषयत्वकल्पनरूपबाधः ।

यदा तु निषेधशास्त्रमेव प्रथमत आलोच्यते तदा तदर्थालोचनोत्तरं निषेध्यप्राप्त्यपेक्षायां प्रापकशास्त्रालोचनात्तेन च विशेषदर्शनसत्त्वेनाज्यभागभ्रान्तिजननायोगान्निषेधपर्यवसानानुपपत्तेरवश्यं प्रापकशास्त्रस्याज्यभागप्रमाजनकत्वमेव निषेधेनाभ्युपगन्तव्यम् । प्रापकशास्त्रस्य विशेषनिष्ठत्वे तु तदावश्यकमेव । तस्माच्छास्त्रप्राप्तस्य निषेधे सर्वत्र प्रमारूपैव प्राप्तिः । अत एव तत्र सर्वत्र विकल्प एवेति मीमांसकमर्यादा ।

न चैवं यत्र रागप्राप्तस्य निषेधस्तत्रापि निषेध्यप्रापकरागस्य बलवदनिष्टाननुबन्धीष्टसाधनप्रमाजनकत्वापत्तेः विकल्पापत्तिः । बलवदनिष्टानुबन्धित्वज्ञानस्य प्रवृत्तिं प्रति प्रतिबन्धकतया तदभावस्यैव कारणत्वेन बलवदनिष्टाननुबन्धित्वज्ञानस्याकारणतया रागेण तत्प्रमाया अजननादिष्टसाधत्वप्रमाजननेऽपि तस्य निषेधावगतानिष्टसाधनत्वेन विरोधाभावान्न तदंशे रागबाधकत्वम् । या तु तत्र सामग्रीसत्त्वे प्रवृत्तिस्सा सामग्र्यभावे न जायत इति दैववशसम्पन्नं बाधकत्वम् । सामग्री हि बलवदनिष्टानुबन्धित्वज्ञानाभावघटिता । अनिष्टसाधनत्वज्ञाने विद्यमानेऽपि हि यदाऽनिष्टगतद्वेषापेक्षयेष्टगतरागस्योत्कटत्वरूपं बलवत्त्वं तदा सामग्रीसम्पत्तिः । यदा त्विष्टगतरागापेक्षयाऽनिष्टगतस्योत्कटत्वरूपं बलवत्त्वं तदा तदभावात्प्रवृत्त्यभावः । अतश्च रागप्रमितेर्विरोधाभावान्न विकल्पापत्तिः । अतः कथं प्राप्तबाधत्वावच्छेदेन प्रापकशास्त्रस्य बाधकशास्त्रेण स्वविषयकताप्रतिबन्ध इति चेत्—न; प्रयोगे प्रापकशास्त्रीयविषयताप्रतिबन्धेन बाधकाभावात् । रागप्राप्तनिषेधे त्वर्थवशसम्पन्नप्रवृत्तिप्रति-

बन्धकत्वेऽपि प्रमाणस्य विषयताप्रतिबन्धाभावाद्बाधव्यवहारो भाक्त इत्यनुसन्धेयम् । तस्मात्सिद्धं श्रुतिलिङ्गादावप्राप्तबाध एवेति ॥ सूत्रं प्रयोजनं च स्पष्टम् ॥

इति श्रीपूर्वोत्तरमीमांसापारावारधुरीणश्रीरुद्रदेवसूनुश्रीखण्डदेवकृतौ मीमांसाकौस्तुभे तृतीयाध्याये तृतीयपादे सप्तमं बलाबलाधिकरणम् ॥

समाप्तोऽयं मीमांसाकौस्तुभः ॥

श्रीविश्वेशार्पणमस्तु ॥

६२ **ब्रह्मवादः**। गोस्वामि श्रीहरिरायजी महाराज विरचितः। श्रीगोपालकृष्ण-भट्ट विरचित विवरणाख्यव्याख्यासमलङ्कृतः। तथा गोस्वामी श्रीव्रजनाथ-
* विरचितो ***ब्रह्मवादः**। तथा ***शुद्धाद्वैतपरिष्कारः** श्रीमद्रामकृष्णभट्ट
* विरचितः। श्रीरघुनाथशास्त्रि विरचित ***शुद्धाद्वैतपरिष्कारतात्पर्यम्**। श्रीहरिशङ्कर शास्त्रि—वेदान्तविशारदेन विस्तृत भूमिकया विविधपरिशिष्टै-र्भाषानुवादेन टिप्पण्यादिना च समलङ्कृतः। [शुद्धाद्वैतसम्प्रदाय वि०१] रु०१—०

६३ **प्रेमरसायनम्**। श्रीविश्वनाथपण्डितरचितम्। [का० वि० ८] रु० १—०

६४ **व्याप्तिपञ्चकरहस्यम् सिंहव्याघ्रलक्षणरहस्यं च**। श्रीमथुरानाथतर्क-वागीशकृतम्। न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्या-ख्यया टिपण्यादि विभूषितं च। [न्या० वि० ८] रु० ०—१२

६५ **सिद्धान्तबिन्दुः**। श्रीमधुसूदनसरस्वती विरचितः। श्रीभगवान्शङ्कराचा-र्य विरचित दशश्लोकव्याख्यारूपः श्रीगौड ब्रह्मानन्दविरचित न्यायरत्नावली-नारायणतीर्थ विरचित लघुव्याख्या टिप्पणीसहितः। [वेदान्त वि० ८] रु० ५—०

६६ **अन्त्यकर्मदीपकः आशौचकालनिर्णयसहितः**। प्रेतकर्मब्रह्मीभूतयति कर्मनिरूपणात्मकः महामहोपाध्याय पं० श्री नित्यानन्दपन्तपर्वतीय विरचि-तः। [कर्मकाण्ड वि० ६] रु० १—८

६७ **सांख्यदर्शनम्**। श्रीमद्विज्ञानभिक्षुकृत सांख्यप्रवचनभाष्यसमलङ्कृतम्। [सांख्य वि० १] रु० २—०

६८ **अनेकार्थसङ्ग्रहो नाम कोशः**। आचार्यश्रीहेमचन्द्रेण विरचितः। [कोश वि० २] रु० २—०

६९ **शिशुपालवधम्**। श्रीमन्माघकविनिर्मितं श्रीवल्लभदेवकृतया सन्देहविषौ-षधिव्याख्यया महामहोपाध्याय श्रीमल्लिनाथकृतया सर्वङ्कषाव्याख्यया समेतम्। सजिल्द ग्लेज़ कागज। सम्पूर्णम्। [काव्य वि० ९] रु० ३—०

६९ ,, ,, [संपूर्णम्] रफ मोटा कागज रु० २—४

७० **जागदीशीपञ्चलक्षणी सिंहव्याघ्रलक्षणं च**। श्रीजगदीशतर्कालङ्का-रकृतम्। न्यायाचार्य पं० शिवदत्तमिश्र विरचित गंगानिर्झरिणीव्याख्यया टिप्पण्यादि विभूषितं च। [न्याय वि० ९] रु० ०—८

७१ **ब्रह्मसूत्रशाङ्करभाष्यम्**। चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम्।
एषो ग्रन्थः भागद्वये पूर्णो भविष्यति किन्तु विद्यार्थिनां सौकर्यार्थमस्याद्यो भागो द्वितीयाध्यायस्य द्वितीयपादान्तमस्माभिः संमुद्रय निष्कासितः। (द्वितीयोपि शीघ्रमेव मुद्रयित्वा प्रकाशयिष्यते)। प्रथमोभागः (वेदान्तविभागे ९) रु० २—८

७२-१ **सिद्धान्तशिरोमणिः**। श्रीभास्कराचार्य विरचितः। गणिताध्यायः वासनाभाष्य सहितः ज्योतिषाचार्य म. म. श्री६मद्बापूदेवशास्त्रिकृतटिप्प णी सहितः। [ज्यो० वि० ४] रु० २—०

७२-२ **सिद्धान्तशिरोमणिः**। ,, ,, ,,
गोलाध्यायः वासनाभाष्य सहितः। ज्योतिषाचार्य म. म. श्री६मद्बापू-देवशास्त्रि कृत टिप्पणी सहितः। [ज्यो० वि० ४] रु० २—०

७३ **काकचण्डीश्वरकल्पतन्त्रम्** । पण्डित रामकृष्ण शर्म्मणा सम्पादितम् । पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम् । [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ **किरातार्जुनीयम्** । श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं०श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] । [काव्य वि० १०] रु० ०—१२

७५ **चन्द्रालोकः** । पीयूषवर्षश्रीजयदेवकवि प्रणीतः । श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः । साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः । [अलङ्कार वि० ३] रु० ०—१२

७६ **किरातार्जुनीयम्** । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ **शक्तिवादः**, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः । [न्यायविभागे १०] रु० ३—०

७८ **माथुरीपञ्चलक्षणी** । पं० श्रीउमानाथाज्र्यालकृतव्याख्या सहिता तथा **माथुरीसिंहव्याघ्रलक्षणम्** । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च । [न्याय वि० ११] रु० ०—६

७९ **रसाध्यायः** । टीकया संवलितः । [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० **पाणिनिव्याकरणे वादरत्नम्** । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र च न्यास परिष्कारपरिशिष्टभेदेन प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासा-विचारिताः तत्र प्रथमं प्रकरणं मुद्रितं द्वितीय प्रकरणमपि मुद्रित प्रायं शिघ्रमेव भवन्तं दृष्टि पथमधिगमिष्यतीति ।) प्रथमो भागः । (व्या० वि १०)रु० १—८

मुद्यमाणग्रन्थाः

१ **शारदातिलकम्** । श्रीमद्राघवभट्टकृतपदार्थादर्शटीकसहितम् ।

२ **मेघदूतम्** । महामहोपाध्याय मल्लिनाथकृत संजीविनी तथा चारित्रवर्द्धन विरचित टीकाद्वयोपेतम् ।

३ **वाग्वल्लभः** । श्रीयुत दुःखभञ्जनकवि विरचित वरवर्णिनीव्याख्या संवलितः ।

सर्वविधपुस्तकप्राप्तिस्थानम्—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज आफिस,

विद्याविलास प्रेस, गोपालमन्दिर के उत्तर फाटक,

बनारस सिटी।